Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुधी-ग्रन्थमालायाः

चतुर्थं पुष्पम्

महाकविकालिकाप्रसादशुक्लविरचितः

भास्करभावभानवः

(सूर्यशतकम्)

सुधीप्रकाशनम्

वाराणसी

१९८३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुधी-ग्रन्थमाला—४

SUDHI SERIES—4

भास्करभावभानवः

(सूर्यशतकम्)

महाकवि-
श्री कालिकाप्रसादशुक्लः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Sudhi Series–4

BHĀSKARA BHĀVA BHĀNAVAH

(Surya Shatakam)

OF

Mahakavi Kalika Prasad Shukla

With Commentaries

BHASKARI & BHANUMATI

Editor

Pandita Rama narayana Shukla

Acharya, M. A., B. Ed.

Pradhanacharya

Yagnashala Sanskrit Pathashala

P. Mathia Shukla,

Dist : Deorea (U. P.)

Commentator

Dr. Gisijesha Kumar Dixit,

Vyakaranacharya, Ph. D.

S. Sanskrit University, Varanasi

SUDHI PRAKASHANA

VARANASI

1983

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुधी-ग्रन्थमालायाश्चतुर्थं पुष्पम्

महाकविकालिकाप्रसादशुक्लविरचिताः
भास्करी-भानुमतीव्याख्यासंवलिताः

भास्करभावभानवः

सम्पादकः

पण्डितरामनारायणशुक्लः,
आचार्यः, एम. ए., शिक्षाशास्त्री
देवरियामण्डलान्तर्गतमठियाशुक्लग्रामे
यज्ञशालासंस्कृतपाठशालायाः प्रधानाचार्यः

व्याख्याकारः

डा० गिरिजेशकुमारदीक्षितः
व्याकरणाचार्यः, विद्यावारिधिः,
सं० संस्कृतविश्वविद्यालयः, वाराणसी

सुधीप्रकाशनम्

१९८३ ई०] वाराणसी [२०४० वि०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रकाशक:
सुधीप्रकाशनम्
पो० बा० ४९,
वाराणसी–२२१००१

Published by
Sudhi Prakashana,
P. B. 49,
Varanasi–221001

© पण्डितरामनारायणशुक्ल:

© Pt. Ramanarayana Shukla

प्रथमसंस्करणम् : १९८३

First Edition : 1983

मूल्यम् : २५ रु०
(पञ्चविंशतिरूप्यकाणि)

Price : Rs. 25
(Twentifive Rupees)

मुद्रक :
चन्द्रप्रभा प्रिंटिंग प्रेस
खजुरी, वाराणसी

Printed at.
Chandra Prabha P. Press
Khajuri, Varanasi

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उपोद्घातः

तमोराशिं भिन्दन्नुदयगिरिकूटञ्च कलयन्
ऋषीणामाद्यानां विधिविहितमर्घ्यं सफलयन् ।
प्रियप्राच्या भाले विमलकरजालैः पिशुनयन्
उदेतीशो भास्वान् कमलकुलमोदं विशदयन् ॥

अस्तीयं भरतभूवलये काचनाविच्छिन्ना पुरातनी वैदिकी लौकिकी च प्रशस्ता परम्परा, यस्यां समेऽपि समुपासका भुवनचक्षुषो भगवतो भास्वत एव स्वस्वसम्प्रदायपरिशीलितपद्धत्या समाराधनां विदधते। यतो हि त्रिभुवनकमनो भगवान् भास्करस्त्रिमूर्त्तिः। तदाहादित्यहृदये—

उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः।
अस्तमाने स्वयं विष्णुस्त्रिमूर्त्तिश्च दिवाकरः॥

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चि-नारायण-शङ्करात्मने॥

[आ० हृ० श्लो० ११७, ११८, ११९]

नैतावदेव, अपितु त्रिभुवनकमनस्य विशिष्टभूषणभूषितस्य भगवतो नारायणस्य साक्षात्कारन्तु साधको दिनमणिमण्डलमध्य एव विदधीतेति कावपि उपायो विधिश्च प्रदर्शितौ—

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥

[आ० हृ० श्लो० १५५]

साधको यावद् दर्शनेऽक्षमः, तावद् रविमण्डले वर्त्तमानमेवानन्तमच्युतं भावयेत्—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सशङ्खचक्रं रविमण्डलस्थितं कुशेशयाक्रान्तमनन्तमच्युतम् ।
भजामि बुद्ध्या तपनीयमूर्त्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥

[आ० हृ० श्लो० १५६]

स्मृतीनां त्वेष आदेश उपदेशश्च यदुषसि भगवन्तं भास्करं समाराध्यैवान्येऽभीष्टाः सुराः समुपासनीयाः। तथा ह्युक्तम्—

अपूज्य प्रथमं सूर्यमपश्यन् यः प्रपूजयेत् ।
न तद्भूतकृतं पाद्यं सम्प्रतीच्छन्ति देवताः ॥

[वीरमित्रोदय, पृ० २३९, चौखम्बा काशी प्रकाशन, सन् १९९१]

नित्यनैमित्तिककाम्येषु कर्मसु सन्ध्योपासनाया नित्यत्वं सन्ध्याया अवश्यकर्त्तव्यत्वञ्चाकल्प्याविधाने द्विजातीनां दण्डो विहितः—

प्रातः सन्ध्यान्तु नोपास्ते नोपास्ते यश्च पश्चिमाम् ।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥

सन्ध्याविधौ च भगवते गभस्तिमते सम्यग घ्यं वितीर्य समुपस्थाय च तं सुरासुरमन्दरमन्थनसमुत्थितश्रुतिपयोराशि नवनीतात्मना ब्रह्मगायत्र्या प्रभाकर एव जपनीयः। अत एव 'गायत्र्या न परो मन्त्रः' इति विदुषां डिमडिमघोषः।

चराचरस्य जगत आत्मा दिनमणिरेवेति सोरस्ताडं समर्थयते ऋग्वेदः—

"सूर्य आत्मा जगतस्तस्थुषश्च"। [१।११५।१]

सकलभुवनस्य परिपालकत्वं भास्वतो निर्दिशन् वेदो वेदयते यत् कनककलितनिखिलावयवं स्यन्दनं समारुह्य सविता भुवनानि समीक्षते यन्न कोऽपि जन्तुर्गाढे तमसि निमज्जेत्—

"हिरण्येन सविता रथेन देवो याति भुवनानि पश्यन् ।"

[ऋग्वेदः १।३५।२]

उपर्युक्तमभिप्रायं महताऽऽडम्बरेण प्रतिपादयन्तः कौषीतकीब्राह्मण-आश्वलायनगृह्यसूत्र-तैत्तिरीयारण्यकप्रभृतयो ग्रन्था निभाल्यन्ते पक्षविपक्ष-विरतैश्शास्त्रपरिशीलनपटुभिरुदारचरितैः कोविदैः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत एव श्रुतिसम्मतेषु पुराणपल्लवितेषूपासनाप्रत्यक्षफलप्रापक-साधकप्रचारितेषु परां प्रसिद्धिमितेषु वैष्णव-शैव-सौर-शाक्त-सौरप्रभृतिषु सम्प्रदायेषु आराध्यदेवसंकलनासु इदम्प्रथमतया [सकललोकचक्षुर्भगवान् दिवाकर एवादरेण स्मृतः—

"आदित्यं गणनाथञ्च देवीं रुद्रञ्च केशवम् ।
पञ्चदैवतमित्युक्तं सर्वकर्मसु पूजयेत्" ॥

निरुक्ते त्रिंशत्कोटिसंख्याकाः सुराः भिन्नभिन्नस्थाननिवासास्त्रिषु देवेष्वन्तर्भाविता आचार्येण यास्केन। तेषु कतिपये रसास्थाना अग्नि-देवेऽन्तर्भाविताः, केचन चान्तरिक्षस्थाना वायाविन्द्रे च समाहिताः, अवशिष्टाश्च द्युस्थाना भगवति भानुमति सन्निवेशिताः । एवञ्च चरा-चरजगदात्मा भास्वान् द्युस्थान इत्याचार्यमतेन प्रतिभाति ।

"अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः, सूर्यो द्युस्थानः, तासां महाभागादेकैकस्या अपि बहूनि नामधेयानि भवन्ति"।

[नि० ७।२।२।३]

भगवतो भास्वतस्त्रिमूर्त्तित्वं व्यवस्थापयन्ती भगवती सूर्यतापनीयो-पनिषदपि स्पष्टमुद्घोषयति—

"एष ब्रह्मा च विष्णुश्च रुद्र एष च भास्करः ।
त्रिमूर्त्यात्मा त्रिदेवात्मा सर्वदेवमयो रविः" ॥

[१।६]

एष एव सिद्धान्त इतिहासपुराणमहाभारतैरपि प्रबलैः प्रमाणैः प्रतिष्ठाप्यत इति नास्ति शङ्कापङ्कावकाशस्त्रिमूर्त्तित्वे भगवतो भानुमतः ।

निखिलसाधनसम्पन्नं शस्त्रशास्त्रनदीष्णं कुम्भकर्णमेघनादेन्द्र-जिदादिरक्षोगणसमेधितसामर्थ्यमुपासितप्रसन्नाद् भगवतो भूतभावनादर्जित-शत्रुपराजयपराक्रमं लङ्काधिपतिं लोकरावणं रावणं विजेतुं परो-त्कर्षापसहिष्णुं शत्रुशातनाद्वितीयसामर्थ्यमावहन्तीं काञ्चिद् दिव्यां शक्ति-मर्जितुकामाय रघुकुलकमलदिवाकराय भगवते श्रीरामभद्राय भास्करो-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पासनामुपदिशन् महर्षिर्मैत्रावरुणिः सर्वदेवमयस्य दिनमणेर्माहात्म्यं महता संरम्भेणावादीत्--

"एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः" ॥

इत्यादिन सन्दर्भेण। [बा० रा०]

दुरधिगमकानने विषीदन्तं रिपुपराजयोपायं पृच्छन्तं पृथासुतुं धर्मराजं राजनीतिनिपुणे निर्ज्ञातनिखिलतत्त्वो योगासनासीनो भगवान् श्री कृष्णः सूर्यस्य त्रिमूर्त्तित्वं व्याजहार—

"प्रातः काले भवेद् ब्रह्मा मध्याह्ने तु महेश्वरः।
सायं काले भवेद् विष्णुस्त्रिमूर्त्तिश्च दिवाकरः" ॥

[महा० भा० आ० हृ०]

एवंविधानि तानि तानि वाक्यानि विष्णुभविष्यादिपुराणेषु भूयांसि समुपलभ्यन्त इति विदन्त्येव विज्ञाः, किं चर्वितचर्वणया !

कालक्रमेणाद्वैतवेदान्तमार्तण्डप्रकाशः सुरगिरिवरमारुह्य स्ववाचोयुक्त्या 'एकमेवाद्वितीयं ब्रह्म', 'नेह नानास्ति किञ्चन' इति श्रुतिसिद्धान्तं सर्वतो भावेन प्रचारितवान्। यस्य प्रभावेण सर्वत्र समदृष्टिसन्देशो व्यापृत;। तथा च एकस्मिन्नपि देवे सर्वदेवमयत्वदर्शनभावना समुदगात्। अद्वैतवादिभिरेकस्य चित्तत्वस्य परमार्थत्वम्, अपरस्य निखिलजगतो मिथ्यात्वं साध्यते। नैतावदेव, 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' इति तेषां दुन्दुभिनादः। अतो भगवति भास्करे सर्वदेवदर्शनं त्रिदेवदर्शनं वा नास्वाभाविकं प्रतिभाति।

परन्त्वस्मिन् परम्परावाहिनि भूवलये शास्त्रनिष्णातानामपि विपश्चितां विचाराः परिवर्त्तमानाः पले पले निभाल्यन्ते। फलतो भक्तिसम्प्रदायोऽप्यात्मलाभमलभत। यस्य भिन्नं भिन्नं स्वरूपं वैष्णवाचार्यैः संस्थापितम्।

अमीषामाचार्याणामप्रतिमप्रयत्नेनानन्यशरणागतिरूपा भक्तिः परां

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काष्ठां प्रापत्। एक एव देवोऽनन्यनिष्ठया सेवनीयः। तस्मिन्नेवान्ये देवा अन्तर्भावयितव्याः। एकस्मिन् साधिते सर्वे सुतरां साधनीयतां समवाप्स्यन्ते। उदाहरन्ति ते परमादरणीया आचार्याः पतिव्रतां पत्नीम्। पतिव्रता स्वपतिव्यतिरिक्तं पुरुषं पुरुषमेव न मन्यते, नैतदेव, अपि तु द्रष्टुमपि न कामयते। अनन्यशरणा भक्ता अपि स्वाराध्यदेवं परिहाय देवान्तरं न यजन्ते। प्रत्युत, तन्मयमेव पश्यन्ति। क्वचन क्वचन द्विषन्तोऽपि समवलोक्यन्ते। स च द्वेष उचितोऽनुचितो वेति विदुषां विचारविषय इति न मया तत्र किञ्चिद् विमृश्यते।

भक्तिसम्प्रदायविकासस्य परा काष्ठैव सौर-गाणपत्य-शाक्त-शैव-वैष्णवसम्प्रदायानां भास्करोदयस्य हेतुरजायत। अद्वैतिनां द्वैतिनां विशिष्टाद्वैतिनां शुद्धाद्वैतिनाञ्च सम्प्रदाये भक्तिसिद्धान्तः सुतरां समादृतः। विविधैरुपायैरुदाहरणैश्च सम्यगुपबृंहितश्च। यद्यपि प्रतिपादनप्रक्रियायामाचारे व्यवहारे च कश्चन भेदो लक्ष्यत इव, तथापि सूक्ष्मेक्षिकया पर्यालोच्यमाने मूले मनागपि भेदो न गोचरो भवति। एकस्मिन्ननेकत्वबुद्धिः, अनेकस्मिंश्चैकत्वबुद्धिरित्येतद् द्वयमपि समानमेव। किन्तु तत्तदाचार्याणां विवेकेनाहोपुरुषिकाप्रदर्शनमात्रपरेण स्मार्तादिसम्प्रदायानामाविर्भावः समजनि।

अद्यत्वे प्राधान्येन स्मार्त-वैष्णव-शाक्त-सम्प्रदायावलम्बिनां विशिष्टं महत्त्वं सर्वत्र वर्तते। अन्ये सम्प्रदाया नगण्या इव दृश्यन्ते। तेषु स्मार्ताः पञ्चदेवोपासकाः सन्ति। तेषामुपासनायां भास्वतो गणेशस्य शक्तेः शिवस्य विष्णोश्च समानमेव स्थानं दृश्यते। ते च पञ्चस्वपि देवेषु एकमेव परमात्मतत्त्वं समवलोकयन्ति। अन्येषु सम्प्रदायेषु एकस्मिन्नेव पक्षपातः। यथा वैष्णवानां विष्णौ, शैवानां शिवे, शाक्तानां शक्तौ।

एवमेव सूर्यभक्तौ पक्षपातमावहतां साधकानां सौरसम्प्रदायः प्रसिद्धिमगात्। अस्यैव सौरसम्प्रदायस्य माहात्म्येन 'त्रिमूर्तिश्च दिवाकरः', 'एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः'—इत्यादिपदैस्तरणिः सर्वदेवमयत्वेन गीयते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एतेषु वैष्णवसम्प्रदायः आन्ध्र-मद्रास-कर्नाटक-गुर्जरप्रदेशेषु स्वकीयां विशिष्टां सत्तामादधाति। शैवश्च सम्प्रदायः आन्ध्र-कर्नाटकयोः स्वरूपेणैवोपलभ्यते। शैवशब्देनात्र वीरजङ्गमशैवः, काश्मीर-शिवशक्तिसामरस्य-शैवो न गृहीतव्यः। शाक्तश्च वङ्गेषु, मिथिलासु, नेपाले, अल्मोडा-गढवाल-गोहाटी-जम्बू-कश्मीर-प्रदेशानां कतिपयेषु भागेषु च सम्प्रदायान्तरविधिः मिश्रित इवाधिगम्यते। गाणपत्यश्चाद्यापि महाराष्ट्रे गुर्जरे किञ्चिदिव निभाल्यते।

महता विषादेनेदमावेदनीयं विद्यते यत् महोज्ज्वलः सौरसम्प्रदायः सम्प्रति लुप्तप्रायतां भजति। अस्य किञ्चिद् रूपं विहारप्रदेशस्य दक्षिण-पूर्वभागे उत्तरप्रदेशस्य च पूर्वस्मिन् भागे स्मार्तसम्प्रदायेन संकीर्णं समवलोक्यते। विहारप्रदेशेऽपि सौरा आत्मानं सौरममन्वाना निखिलमपि धर्मकृत्यं स्मार्तपद्धत्या विदधति। परन्तु वैशिष्ट्यमिदमवश्यमस्ति यद् भगवन्तं भानुमन्तं केनापि रूपेण स्वककुलदेवं मूलं वा मन्यन्ते।

अल्पीयस्यापि संख्यया एते सम्पूर्णे भारते निवसन्ति। मग-मागध-भोजक-शाकद्वीपीयब्राह्मणत्वेन जातिरपि तेषां प्रसिद्धा। अमीषामभिधानानामवान्तरभेदार्थविबोधनाय शाम्बभविष्यपुराणे प्रेक्षणीये।

दिवाकरोपासनाद्वारा कुष्ठव्याधिबाधितस्य शाम्बस्य नैरुज्याय शाकद्वीपादानीता विप्रा इमे शाकद्वीपीयाभिधामिताः। पुनः शाम्बस्य कुष्ठशमनानन्तरं शाकद्वीपं गरुडेन नीयमाना जरासन्धेन प्रार्थिता राजगृहे विहारप्रदेशैकदेशे गरुडादवतीर्य केनापि प्रयोजनेन न्यवात्सुरित्येतत् सर्वं शाम्बपुराणादवगम्यते।

अद्यापि पटना-गयाजनपदेषु संख्यैतेषां भूयसी वर्तते। जीवनयात्रा-निर्वाहाय शनैश्शनैरेते सकमलपि भारतं स्वनिवासेन समलमकार्षुः। सूर्योपासका गायत्रीसमाराधकाश्चेति विहारप्रदेशे स्वमूलस्थाने ब्राह्मणेषु महती प्रतिष्ठाऽमीषामस्ति।

वाराहमिहिरोऽपि भास्करोपासनया लब्धविद्य आचार्यपदवीं प्राप्त इति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बृहत्संहितायाः उत्पलमहाचार्यकृतव्याख्यायाः प्रथमश्लोकादवगम्यते—'आवन्तिकार्यं मगध द्विज वाराहमिहिरोऽर्कंवर प्रसादः'। बृहज्जातकग्रन्थे षड्विंशेऽध्याये उक्तार्थक एव श्लोक उपलभ्यते।

तदानीन्तने काले शाकद्वीपीयद्विजानां शनैः शनैः भरिते प्रसारे जाते सूर्योपासनायाः प्रचण्डः प्रतापः परां काष्ठां प्रापत्। ततश्चादित्यस्यार्चा प्रतिसदनं तथा प्रविवेश येनानेके काश्यपोपतय आत्मानं भास्करभक्तं प्रमाणयितुं स्वाभिधानं तद्वाचकपदेन संयुञ्जन्ति स्म। विक्रमादित्य-बालादित्य-प्रभाकरवर्द्धनादीनि नामानि निदर्शनायात्र पर्याप्तानि भविष्यन्ति। सेनकुलोद्भवः क्षोणीपतिः केशवसेन आत्मनः सौरत्वं निस्संकोचं प्रतिष्ठापयति स्म। सम्राजो हर्षवर्द्धनस्य प्रयागयात्रायां विष्णु-बुद्धप्रतिमार्चनया साकं भास्करप्रतिमाप्यर्च्यमानाऽऽसीत्।

शङ्करदिग्विजयस्य कर्त्ताऽऽनन्दगिरिः प्रतिपादयति यत् भगवतः शङ्कराचार्यस्य दक्षिणभारतयात्राप्रसङ्गे सौरसम्प्रदायाचार्यैः दिवाकरोऽक्षिगोचरतां गमितः। अतोऽष्टम्यां शताब्द्यामपि सौरसम्प्रदायः केनापि रूपेणाऽऽसीदेव। शङ्करदिग्विजयस्यैतिहासिकचर्चाविषये विद्वांस एव प्रमाणमिति नात्र किञ्चिद् विमृश्यते।

श्रीरामकृष्णगोपालभण्डारकरस्य 'वैष्णव शैव और अन्य धार्मिक मत' नामके ग्रन्थे [हिन्दी अनुवाद, अनुवादक—श्री माहेश्वरी प्रसाद, पृ० १७५] भास्करोपासकानां षड् विभागाः प्रदर्शिताः। समेषामपि सूर्योपासकानां भालं रक्तचन्दनतिलकितं कण्ठश्च रक्तपुष्पमालामहितो दृश्यते। अष्टाक्षरमन्त्रजपस्तु तेषां परमं लक्ष्यम्। उपासकेषु केचन प्रातः सूर्यमुपासते, केचन मध्याह्ने, केचन च सायम्। कतिपये च ब्रह्म-विष्णु-महेश्वरात्मानं भानुमन्तं मत्वा कालत्रयेऽप्युपासते। केचन चैवंविधाः सन्ति ये सूर्यमण्डलं दृष्ट्वैवाश्नन्ति। सन्त्यनेके तथाविधा अपि ये ललाटे भुजयोर्वक्षसि च तप्तसूर्यमुद्राङ्किता विलोक्यन्ते। एतैः पुरुषसूक्तस्य शतरुद्रीयस्य च व्याख्यया भगवान् भास्वानेव भावितः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

केचन सौरसम्प्रदायदीक्षिता गौर्जराः प्रत्यहं स्थाले रक्तचन्दन-निर्मिताष्टदलकमलस्य प्रत्येकं दले समुल्लिखितभास्करमन्त्रे समाराधयन्ति भगवन्तं भास्करम् ।

उत्तरभारते विशेषतो विहारप्रदेशे प्रतिरविवासरं कतिपये रविसमुपासका अक्षररक्तान्नं सूर्यास्तात् पूर्वं सकृदेव भुञ्जते । केचन मार्गशीर्षस्य शुक्लपक्षे शुभे नक्षत्रे रविव्रतमारभ्य वैशाखमासे उद्यापयन्ति ।

हेमाद्रिप्रतिपादितविधिना एकस्मिन् मासे तुलस्या एकेन दलेन द्वाभ्यां दलाभ्यां वा, कस्मिश्चन च मासे पञ्चामृतांशेन घृतांशेन वा, एकस्मिश्च मासे पञ्चगव्येन वा द्वादश मासान् रविव्रतं समाचरन्ति । एवं विभिन्नैः प्रकारैर्जना रविव्रतं समाद्रियन्ते ।

विहारप्रदेशे उत्तरप्रदेशस्य पूर्वस्मिश्च भागे सूर्यषष्ठीव्रतं परां प्रसिद्धिं प्रापत् । व्रतमिदं कार्तिकशुक्लचतुर्थीमारभ्य सप्तमीं यावत् दिनचतुष्टयं समाराध्यते । शरीरशुद्ध्यर्थं प्रथमेऽह्नि पूतमाहारवस्तु भुज्यते, द्वितीयस्मिन्नहनि दिवोपोष्य नक्तं प्रथमे प्रहरे स्वल्पं प्राणरक्षामात्रसाधकं यज्ञीयमेकमन्नमेकरसश्च गृह्यते । तृतीयस्मिन् वासरे निर्जलेन व्रतिना सायमस्ताचलमारूढः सूर्यो यथाशक्ति यथावैभवं पुष्पफलवसनैरुपास्यते ! चतुर्थे च तस्मिन् अरुणोदये भगवान् भास्करः समुपलब्धयजनद्रव्यैरर्च्यते ।

व्रतं चेदमतीव दुष्करं तथापि चमत्कृतिजनकफलकमिति अनेककृत्वः प्रत्यक्षमन्वभूयत । व्रतस्यास्य मूलं महाभारते समुपलभ्यते । वने निवसतो महाराजस्य युधिष्ठिरस्यान्नाभावे महत्कष्टं समजनि । भगवता कृष्णेनोपदिष्टया भगवतो भानुमत उपासनयाऽक्षयपात्रं द्रौपद्याऽवाप्तम् ।

काश्यां लोलार्कषष्ठीति नाम्ना ख्यातायां भाद्रपदशुक्लषष्ठ्यां कामं दर्शनीये प्राचीनतमे भदैनीक्षेत्र(मुहल्ला)स्थिते लोलार्ककुण्डे सूनुकामनया स्नान्तीनां रमणीनामद्यापि महान् संमर्दः समवलोक्यते । तत्र भिन्न-भिन्न-कामनया विभिन्नाभिः सामग्रीभिः भगवान् भानुमान् समुपास्यत इति नापरोक्षं प्रेक्षावताम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रावणविजयाय सूर्यव्रतमगस्त्येन रघुकुलतिलको रामभद्रः समुपदिष्टः।

नैतावदेव, निखिलेऽपि भारते तत्र तत्र सहस्ररश्मेरत्यन्तं प्राचीनानां भग्नमन्दिराणामवशेषः सम्प्रति सहृदयानां मनांस्युद्वेजयति। ईसवीयाष्टमशतके कश्मीरभूपालेन ललितादित्येन निर्मितमधुना मटनेतिनाम्ना ख्यातिं गतं मार्तण्डमन्दिरमारभ्यैव प्रतिवर्षममरनाथस्य यात्रा भवति। ईसवीयपञ्चमशतके दशपुरा सूर्यमन्दिरम्, कोणार्कसदनम्, मूलतानसूर्यमन्दिरम्, बोधगयायाः स्तूपफलकेऽर्कमूर्त्तिः एलोरागुहासूर्यमूर्त्तिः, ईसवीयषष्ठशतके मिहिरकुलस्य पञ्चदशेन ग्वालियरनरेशेन निर्मितं सूर्यसदनम्, अष्टमे शतके गौड़देशभूपालेन पुण्ड्रवधनेन पुण्ड्रार्कमन्दिरम्, पञ्चमे शतके मन्दसौर-सूर्यमन्दिरम्, गुर्जरप्रान्ते पाटनसमीपे मोधेरास्थाने सूर्यमन्दिरञ्च भारते दिवाकरस्यार्चनाव्यापकतां साध्नुवन्ति।

भारतीयसंस्कृतेः केन्द्रभूतायां सकलसम्प्रदायाश्रयदायां काश्यां सौरसम्प्रदायस्य सत्त्वे किमाश्चर्यम्! द्वादशमासानां द्वादश आदित्याः सन्ति, तेषां नामानि[1] च पृथक् पृथक् सन्ति। तेषां सर्वेषां मूर्त्तयोऽत्र संस्थापिताः सन्ति। भदैनी-मीरघाट-ललिताघाट-मृत्युञ्जयमन्दिर-विश्वनाथमन्दिरसन्निकटस्थहनुमानमन्दिर-मिश्रपोखराप्रभृतिस्थानेषु सम्प्रत्यपि द्वादशादित्याः पूज्यन्ते। द्वादशादित्यानां पूजाप्रकारोऽनेकपुराणसंगृहीतसारभूतेषु हेमाद्रि-वीरमित्रोदयादिग्रन्थेषु द्रष्टव्यः।

भास्करार्चाया यद्यपि सन्त्यनेकानि फलानि तथापि कुष्ठरोगनिवारणमसाधारणफलमित्यनेकशास्त्रपर्यालोचनेनावगम्यते। अत्र च सन्त्यनेकानि

---

१. आदित्यः प्रथमं नाम द्वितीयन्तु विभाकरः।
तृतीयं भास्करः प्रोक्तञ्चतुर्थञ्च प्रभाकरः॥
पञ्चमञ्च सहस्रांशुः षष्ठञ्चैव त्रिलोचनः।
सप्तमं हरिदश्वश्च अष्टमञ्च विभावसुः॥
नवमं दिनकृत् प्रोक्तं दशमं द्वादशात्मकः।
एकादशं तपोमूर्त्तिर्द्वादशं सूर्य एव च॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

निदर्शनानि यदादित्यहृदयपाठेन रविव्रतेन च श्वेतकुष्ठं मूलतो नाशमगात्। अत्र मयूरभट्टस्य 'सूर्यशतकम्' विशेषत उदाहरणीयम्।

अद्यत्वे तु गवेषकैरिदमपि गवेषितं यत् आरा-पटना-जनपदसीम्नि शोणभद्र(सोन)नदतटे कस्यचन ग्रामस्य निवासी बाणभट्टो मगवंशीयो ब्राह्मण आसीत्। आरामण्डलस्य देवकरणार्कग्रामात् प्राप्तात् सप्तमशतके लिखितात् शिलालेखादवगम्यते यत् वरुणार्कं देवपूजानिमित्तमयं ग्रामो भोजकब्राह्मणाय सूर्यमित्राय दीयते।[1]

इत्यमेव एकादशशतके गयाजनपदस्य गोविन्दपुरग्रामात् प्राप्ताद् शिलालेखाद् भास्कराचर्यायाः प्राचीनता लोकप्रियता च व्यवस्थाप्यते।

सम्प्रतीतिहासस्य पुरातत्त्वस्य च भाषाविज्ञानस्य गवेषणया तु सम्प्रदायान्तरेष्विव सौरसम्प्रदायेऽपि महती विचारविडम्बना समुदपादि।

तथाहि—महाभारतस्य शान्तिपर्वणो नारायणीयखण्डस्यावलोकनाद् विज्ञायते यत् श्वेतद्वीपाद् वैष्णवभक्तिर्देवर्षिणा नारदेनात्रानीतेति।

"अयञ्च श्वेतद्वीपः योरपदेशस्य कश्चन भागो वर्तते, ऐकान्तिकी भक्तिः ईसाई-धर्मविलम्बिनामासीत्, गजमुखः (गणपतिः) अनार्याणां पूज्य आसीत्, धृतनरकपालो रुद्रः (शिवः) श्मशानवासिनाम्, शक्तिश्च शोणितपानैकपरायाणानां वनेचराणाम् पूज्याऽऽसीत्। एवमेव, सौर-सम्प्रदायः सूर्यपूजा च पारसीकानामासीत्, ईसवीयविंशतितमे शतके भारतं प्रविष्टैश्शकैर्हूणैश्चात्रानायि" इत्याधुनिका विचारकाः। सर्वमिदं वेद-महाभारत-रामायणग्रन्थानवलोकनजन्यप्रमादप्रजल्पितं भारतीयपर-म्परोपेक्षापरायणानां तेषां गवेषकाणाम्।

एवमेव तत्तत्सम्प्रदायदीक्षिताः अयङ्गार-शय्यर-चित्पावन-कान्य-कुब्ज-मैथिल-पङ्क्तिपावन-सरयूपारीण-मगा ब्राह्मणा येन केनापि प्रकारेण

---

१. विज्ञापित श्री वरुणावासिभट्टारक प्रतिबद्ध भोजक सूर्यमित्रेण उपरि-लिखित.........ग्रामादि संयुत श्री बलादित्यदेवेन।

[फ्लीट्स इन्सक्रिप्सन आफ दि गुप्ता किंग्स, पृ० २१७]

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कलङ्किता भारतीयशास्त्रपरम्परानभिज्ञैर्नवीनैः स्वेच्छाचारैराधुनिकैर्गवेषकैः। सर्वमेतत् श्रीक्षितिमोहनसेनस्य भारते 'जातिप्रथा तथा सांस्कृतिक संगम', हेंग कृत 'पारसीज तथा ऐसेज आन दी पारसीज', विल्सन कृत ह्वाटकास्टस, १९०९ तमे प्रकाशिते गोरखपुर गजेटियर, थर्संटनकृत ट्राइब्स, सादर्न इण्डिया प्रभृतिषु पुस्तकेषु द्रष्टव्यम्।

उपर्युक्तेषु पुस्तकेषु लिखितं यत् सूर्योपासकाः शाकद्वीपीया मगाः पारसीकधर्मं गुरुवमग्गी एव, मिस्र इत्येव मिश्र इति। इदं सर्वमाकाशकुसुममिव। यतो हि ऋग्वेदस्य प्रथममन्त्रेऽग्निः स्तूयते, पारसीकैरप्यग्निः पूज्यत इति कृत्वा पारसीकानां प्रभावसमर्थनम् परम्पराविरुद्धम्। पारसीकेषु यद्यप्यग्निपूजा दृश्यते, परन्तु सूर्यपूजाया नास्ति किञ्चित् महत्त्वम्। सूर्यवाचको मिहिरशब्दः पारसी मिहिरशब्द एव, मगब्राह्मणो वराहमिहिरः पारसीक एवेत्यादि प्रतिपादनं मत्तप्रलाप एव। यतोहि वराहमिहिरेण स्वरचितवृहत्संहितायां प्रतिपादितं यत्—

"म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्वेदविद् द्विजः"॥

[बृ० सं० अ० २, १४१२ श्लो०]

अत्र श्लोके प्रतिपादिता यवना मोहम्मदीया न स्युः। यतोहि पञ्चके शतके वराहमिहिरोऽभूत्, सप्तमे च मोहम्मद आसीत्। शाकद्वीपीयाः शाकलद्वीपीयाश्च परस्परं भृशं भिन्नाः। महाभारते सभापर्वणि प्रतिविन्ध्यभूपालेन इन्द्रप्रस्थादुत्तरस्यां दिशि वर्तमानस्य शाकलद्वीपस्य शासकेन साकमर्जुनस्य युद्धमभूदिति वर्णितमस्ति।

[म० भ० स० २६।५]

पार्श्वद्वयवारिपरिवृतपृथिवीतोऽन्यस्मिन्नप्यर्थे प्रयुज्यमानो द्वीपशब्दो निभाल्यते। यथाऽथर्ववेदे ऋषेर्नाम सिन्धुद्वीपोऽस्ति।

[सूक्त १०।२।५]

एवं सौरसम्प्रदायस्य वैदिकत्वे भारतीयानां स्वत्वे च विचिकित्सा नास्तीति प्रतिपादयतो मे मनो मनागपि न सङ्कुचति। यद्यपि सम्प्रदाय-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्यास्य साधकपरम्परा कालकवलितेव प्रतिभाति, तथापि तत्र तत्र साधनापद्धतिरधुनापि सम्प्रदायैकैकनिष्ठैः साधकैः सेव्यमाना समवलोक्यते। अतो मया विनिवेद्यन्ते विद्वांसो यत् सा भूयोभूयः संवर्द्धनीयेति।

अर्चा च बहुविधा दृश्यते। कैश्चित् साधकैः पुष्पधूपदीपनैवेद्यादिभिः स्वाभीष्टा देवाः सभाज्यन्ते, कैश्चिच्च मनःकुसुमैः वाङ्मात्रेण। अस्मिन् ग्रन्थे चास्मत्पितृचरणैः वाङ्मय्यार्चया समाराधितः स भगवान् गभस्तिमान्।

अत्र च शिखरिणीछन्दोबद्धैः शतेन श्लोकैर्भगवान् भास्करः समाराधितः। एकस्मिंश्च श्लोके फलश्रुतिर्निवेदिता। अन्ते च कतिपयैः श्लोकैः स्ववंशपरिचयः संक्षेपेण व्यधायि।

शतकञ्चेदं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणाध्यापकेन डा० गिरिजेशकुमारदीक्षितेन संस्कृत-हिन्दीव्याख्याभ्यां भूषितमिति तं भूयोभिर्धन्यवादैः संयोजयामि।

उपोद्घातस्यास्य सम्पादने १९८१तमे ख्रिष्टाब्दे वाराणसेय बौद्धभारती-परिषदा समायोजितायां भारतीयसाधना-परिसंवादगोष्ठ्यां डा० मुरलीधर-पाण्डेयैः पठितेन 'सूर्योपासना'-निबन्धेन सौरसम्प्रदायस्यैतिह्यप्रकाशने भृशमुपकृतमिति तेभ्यो विशेषेण साधुवादा वितीर्यन्ते। अन्ते चात्र ममानविकारचेष्टा क्षन्तव्या सहृदयैर्दयालुभिर्मनीषिभिः, यतो हि—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

दीपावलिः, २०४० वि०

यज्ञशालासंस्कृतपाठशाला,
मठियाशुक्लग्रामः
जि० देवरिया

विदुषां वशंवदः
रामनारायणशुक्लः
प्राचार्यः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

निवेदन

पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्।
दिव्याम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं नमामि ॥ १ ॥

धर्मप्रधान इस देश में आचार का महत्त्व सर्वदा से रहा है। शास्त्रों के विवेचन के आधार पर धर्म का यथावत् पालन करना ही आचार कहलाता है।

"चतुर्णामपि वर्णानामाचारो धर्मपालनम्।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः" ॥ (दक्षस्मृतिः)

यह सर्वविदित है कि अनेक जन्मों के अर्जित प्रभूत पुण्यपुञ्जपरिपाक से ही इस संसार में मानव शरीर प्राप्त होता है। शास्त्रकारों ने धर्म के ही आधार पर मानव को पशुओं से अलग रखा है और मानवयोनि की उत्कृष्टता स्वीकार की है।

"आहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः" ॥ (मनु०)

मानव शरीर प्राप्त करने का परम लक्ष्य मोक्ष प्राप्त करना है। अन्य योनि में उत्पन्न जीवों के लिये मोक्ष प्राप्त करना असम्भव नहीं तो कठिन अवश्य है; क्योंकि स्वर्गापवर्ग प्राप्ति में समर्थ ज्ञान का निर्धारण अन्य योनियों में पड़े हुए जीव को नहीं हो सकता। पुरुषार्थचतुष्टय निरूपण के द्वारा भी महर्षियों का सङ्केत उक्त परम लक्ष्य की ओर ही है।

धर्मार्थकाममोक्षाणां यत्रैकोऽपि न विद्यते।
अजागलस्तनस्यैव तस्य जन्म निरर्थकम् ॥ (पञ्चतन्त्र)

उपर्युक्त आधार पर यह निर्विवाद सत्य सिद्ध है कि मनुष्ययोनि, भवसागर पार करने वालों के लिये एक मूर्तिमती नौका है। इसलिये यह

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कहना असंगत न होगा कि बिना इस नौका के भवसागर पार करना काव्य की भाषा में आकाशकुसुमवत्, शशशृङ्गवत् एवं पामरजनों से भी बोध्य लोक की भाषा में असम्भव है।

मानवयोनि प्राप्त करने का शाश्वत फल जो मुक्तिपद-प्राप्तिरूप परमगति को प्राप्त करना है वह ज्ञान और कर्म के विना उसी प्रकार से सम्भव नहीं है जिस प्रकार आकाश में विचरणरूप पक्षियों की गति दोनों पंखों के विना सम्भव नहीं होती।

"उभाभ्यामेव पक्षाभ्यां खे यथा पक्षिणां गतिः।
तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः" ॥ (कुमारिल)

वैसे तो प्रायः प्रत्येक योनि में उत्पन्न जीव को कुछ न कुछ ज्ञान रहता ही है और वह कुछ न कुछ कर्म भी करता है, किन्तु उस ज्ञान और कर्म के द्वारा परम गति की प्राप्ति कथमपि नहीं हो सकती, क्योंकि जिस ज्ञान और कर्म की आवश्यकता परमगति की प्राप्ति के लिये है उसका यथार्थतः निर्धारण एवं पालन मानवयोनि प्राप्त जीव ही कर सकता है। इस प्रकार अन्य योनियों की अपेक्षा मानवयोनि की श्रेष्ठता स्वतः सिद्ध हो जाती है।

मुक्तिपद की प्राप्ति में अन्तःकरण की शुद्धता का प्रथम स्थान है। अन्तःकरण की शुद्धि के विना मुक्ति की प्राप्ति तो दूर रहे, जीव उसका अधिकारी तक नहीं हो सकता। अन्तःकरणशुद्धि के अनेक उपाय शास्त्र-कारों द्वारा बताये गये हैं। उन उपायों में सबसे सरल उपाय उपासना का है। यद्यपि उपासना भी एक तरह की नहीं होती। उपास्य-भेद से उसके भिन्न-भिन्न प्रकार हुआ करते हैं। किन्तु उपास्य-भेद से तत्तद्-भेदों के रहने पर भी अन्ततः उसे उपासना के नाम से ही जाना जाता है।

उपासना की विविध परम्पराओं में जहाँ मन्त्रों, स्तोत्रों, एवं उपास्य देव के नाम-कीर्तन आदि के द्वारा उपासना का एक प्रकार विहित है,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वहीं अत्यन्त प्राचीन काल से चला आ रहा एक दूसरा प्रकार "शतक" के द्वारा उपासना करने का भी है। इन्हीं परम्पराओं में मयूर भट्ट के 'सूर्य-शतक', बाणभट्ट के 'चण्डीशतक', सोमेश्वर देव के 'रामशतक' और जम्बू कवि के 'जिनशतक' आदि को रखा जा सकता है। जहाँ तक यह प्रश्न है कि किस देवता की उपासना किस अभीष्ट सिद्धि के लिये किस विधि से करनी चाहिये? यह एक स्वतन्त्र एवं महत्त्वपूर्ण विषय है। यदि इसके सम्बन्ध में यहाँ एक-एक करके निरूपण किया जाय तो वह एक स्वतन्त्र ग्रन्थ हो जायेगा, जो प्रासंगिक नहीं कहा जा सकता। इसलिये देवता की उपासना का विधान शास्त्रों में प्रतिपादित हैं, और सबका महत्त्व भी अलग-अलग वीतराग तत्त्वदर्शी महर्षियों द्वारा वर्णित है।

किन्तु सूर्योपासना का अपना एक अलग ही महत्त्व है—

यावन्न दीयते चार्घ्यं भास्कराय महात्मने।
तावन्न पूजयेद् विष्णुं शङ्करं वा महेश्वरम्॥

(नन्दिकेश्वर संहिता)

इस प्रकार उपर्युक्त विवेचन के आधार पर सूर्योपासना की सर्वोत्कृष्टता में कहीं भी कोई का सन्देह नहीं रह जाता। यही कारण है कि इस रहस्य को अगस्त्य ऋषि से जानकर मर्यादापुरुषोत्तम राम ने भी रावण पर विजय प्राप्त करने के लिये भगवान् सूर्य की ही उपासना की।

"राम राम महाबाहो शृणु गुह्य सनातनम्।
येन सर्वानरान् वत्स समरे विजयिष्यसे॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपेन्नित्यमक्षयं परमं शिवम्॥

(बाल्मीकिकृत आदित्यहृदयस्तोत्र)

यही नहीं, अर्जुन द्वारा पूछे जाने पर अपने अनन्य भक्त की भक्ति से वशीभूत होकर योगासनासीन भगवान् श्रीकृष्ण ने भी मुक्तकण्ठ से सूर्योपासना का महत्त्व अर्जुन के लिए सुनाया है—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥
सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनम् आयुर्वर्द्धनमुत्तमम् ॥
अमित्रदमनं पार्थ सङ्ग्रामे जयवर्द्धनम् ।
वर्द्धनं धनपुत्राणामादित्यहृदयं शृणु ॥

(भविष्योत्तरपुराणान्तर्गत आदित्यहृदयस्तोत्र)

उपर्युक्त विवेचन के आधार पर यह हम डिम डिम घोष के साथ कह सकते हैं कि सूर्य की उपासना सर्वविध अभीष्ट फल को देने वाली है। साथ ही आरोग्य लाभ के लिये तो यह अमोघ अस्त्र ही है।

"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात् ॥ (मत्स्यपुराण)
विस्फाटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ।
शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनम् ॥

(भविष्योत्तरपुराणान्तर्गत आदित्यहृदय स्तोत्र)

यहाँ तक कि कुष्ठ जैसे असाध्य रोगों से ग्रस्त भी सूर्योपासक भगवान् सूर्य की कृपादृष्टि मात्र से ही इस महाव्याधि से सद्यः मुक्त हो जाता है।

यज्जपान्मुच्यते जन्तुर्दारिद्र्याद्याशु दुस्तरात् ।
लभते च महासिद्धिं कुष्ठव्याधिविनाशनम् ॥
कुष्ठव्याधयस्तथा दद्रुरोगाश्च विविधाश्च ये ।
जायमानस्य नश्यन्ति शृणु भक्त्या त्वमर्जुन ॥

(भविष्योत्तरपुराणान्तर्गत आदित्यहृदय स्तोत्र)

के उपर्युक्त विवेचनों से सूर्योपासना के महत्त्व को देखते हुए इसकी सर्वोत्कृष्टता के विषय में कहीं कोई सन्देह का स्थान नहीं रह जाता।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ज्ञानजन्या भवेदिच्छा, इच्छाजन्या कृतिर्भवेत् ।
व्यापारः कृतिजन्यश्च ततः फलमुदीरितम् ॥

इस न्याय के अनुसार सूर्योपासना के महत्त्व-ज्ञान के पश्चात् सूर्योपासना की विधि जानने की बलवती इच्छा का होना स्वाभाविक एवं प्रसङ्गानुकूल ही है ।

पूर्वारुणे दिनमणौ नयनोत्पलाभ्याम्
आलोकयेद्धृदि जपन् ननु निर्निमेषम् ।
आरुढ उन्नतपदे शनकैः प्रवृद्धिं
कुर्यादुपासनविधिं प्रतिसन्ध्यमेतत् ॥ (योगी गुरुः)

सूर्योपासक को प्रातःकाल नित्यक्रिया से निवृत्त होकर, स्नानकर, शुद्ध[1] वस्त्र पहनकर, उपवस्त्र[2] धारण कर, [3]पूर्वाभिमुख होकर कुशासन पर बैठ जाना चाहिये । तत्पश्चात् सर्वप्रथम यज्ञीय भस्म अथवा तीर्थ की मिट्टी को लेकर जल मिश्रण कर अथवा केवल जल से [4]तिलक करने के बाद विष्णु-स्मरण के द्वारा पवित्र होकर आचमन, शिखाबन्धन, आसन शुद्धि आदि करके संकल्प[5] करना चाहिये । पश्चात् गायत्री[6] का आह्वान

---

१. न स्यूतेन न दग्धेन पारक्येण विशेषतः ।
मूषकोत्कीर्णजीर्णेन कर्म कुर्याद् विचक्षणः ॥—(आपस्तम्बः)

२. होमदेवार्चनाद्यासु क्रियासु पठने तथा ।
नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे ॥—(विष्णु पुराणम्)

३. प्राक् पश्चिमोदगास्यस्तु प्रातः सायं निशासु च ॥—(वाचस्पतिः)

४. ललाटे तिलकं कृत्वा सन्ध्याकर्म समाचरेत् ।
अकृत्वा भालतिलकं तस्य कर्म निरर्थकम् ॥—(प्र० पा०)

५. संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः ।
व्रतं नियमधर्मौ च सर्वे संकल्पजाः स्मृताः ॥—(मार्कण्डेय पुराणम्)
संकल्पञ्च यथा कुर्यात् स्नानदानव्रतादिके ।
अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति च ॥—(बृहद्यमः)

६ गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्ने एवं सन्ध्या त्रिधा स्मृता ॥—(व्यासः)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर तीन बार प्राणायाम करना चाहिए। प्राणायाम के समय दाहिने अंगूठे से दाहिने नासापुट को बन्द करके "ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्" इस मन्त्र का जप करते हुए नाभि प्रदेश में विष्णु का ध्यान करना चाहिये। इसके बाद अनामिका और कनिष्ठिका दोनों अंगुलियों की सहायता से वामनासापुट को भी बन्द करते हुए उपर्युक्त मन्त्र को जपते हुए हृदय प्रदेश में ब्रह्मा का ध्यान करना चाहिये। पुनः उपर्युक्त मन्त्र को जपते हुए वाम नासापुट को बन्द रखते हुए तथा दक्षिण नासापुट से वायु का त्याग करते हुए ललाट भाग में शिव का ध्यान करना चाहिये। इस तरह एक प्राणायाम होता है। इसी प्रकार तीन प्राणायाम करना चाहिये। पुनः गायत्रीमन्त्र का उच्चारण करते हुए गन्धाक्षत पुष्प युक्त जल के द्वारा तीन बार अर्घ्य देना चाहिये।

इस प्रकार अनिवार्य रूप से सन्ध्या करने के पश्चात् सूर्योपासक को अष्टदल कमल को प्रणवादि से प्रतिष्ठित कर अष्टदल कमल के अग्रभाग में मायाबीज का उल्लेख करते हुए यन्त्र का निर्माण कर सूर्योपासना में प्रवृत्त होना चाहिए।

पूर्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम्।
मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति॥

(भविष्योत्तरपुराणान्तर्गत आ० हृ० स्तो०)

उपर्युक्त आठों दलों में आदित्य, भास्कर, भानु, रवि, सूर्य, दिवाकर, मार्त्तण्ड और तपन आदि योजित करना चाहिये। पुनः दीप्ता, सूक्ष्मा, जया, भद्रा, विभूति, विमला, अमोघा, विद्युता और मध्य में सर्वतोमुखी 'श्री' का उल्लेख करने के पश्चात् गायत्रीमन्त्र का आवाहन, भगवान् सूर्य का ध्यान तथा नमस्कार करके शिर में अर्क, ललाट में रवि, नेत्रों में सूर्य, कानों में दिवाकर, नासिका में भानु, मुख में भास्कर, ओष्ठों में पर्जन्य,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जिह्वान्तर में तीक्ष्ण, कण्ठ में सुवर्णरेता, स्कन्धों में तिग्मतेज, बाहुओं में पूषण, पृष्ठ भाग में मित्र, दाहिने हाथ में वरुण, बायें हाथ में त्वष्टा, दोनों हाथों में उष्ण किरण, हृदय में भानुमान्, उदर में यम, नाभिमण्डल में आदित्य, कटि भाग में हंस, ऊरुओं में रुद्र, जानुओं में गोपति, जङ्घाओं में सविता, पैरों में विवस्वान्, गुल्फों में दिवाकर, बाहर तमोध्वंस, भीतर भग (ऐश्वर्यशाली), सभी अंगों में सहस्रांशु, तथा दिशा और विदिशा में भी भग (ऐश्वर्यशाली) का न्यास करना चाहिये।

उपर्युक्त विधि से न्यास करने के पश्चात् गायत्री जप के लिये विनियोग कर एवं वस्त्र से दक्षिण हस्त को आच्छादित कर नाभि प्रदेश में हाथ को करके जप करना चाहिये। पुनः भगवान् सूर्य को जप का अर्पण करके सात बार सूर्य की प्रदक्षिण कर—

ॐ एकचक्रो रथो यस्य दिव्यः कनकभूषितः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः॥

इसका उच्चारण कर भगवान् सूर्य को प्रणाम करना चाहिये। पश्चात्—

ॐ उत्तरे शिखरे देवि भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्॥

इस मन्त्र के द्वारा सन्ध्या विसर्जन करना चाहिये। संक्षेपतः सूर्योपासना की यही प्रशस्त विधि है।

यह कहा जा चुका है कि उपासना की अनेक परम्पराओं में 'शतक' के द्वारा उपासना करने की भी एक परंपरा अत्यन्त प्राचीन काल से चली आ रही है। आपके समक्ष प्रस्तुत यह "भास्करभावभानवः" जिसे अन्त में 'शतक' कहा गया है, शतक के द्वारा उपासना करने की परंपरा के अन्तर्गत ही विद्वान् लेखक का एक सफल प्रयास है। यह मुख्य रूप से शिखरिणी छन्द में विरचित है। श्लोक संख्या १ से लेकर श्लोक १०७ तक सूर्य की उपासना है और श्लोक संख्या १०८ के द्वारा भगवान् सूर्य

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

के चरणों में शतक का समर्पण है। अन्त में विभिन्न छन्दों में विरचित १८ श्लोकों के द्वारा लेखक के जनपद, जन्मस्थान एवं वंश आदि का संक्षिप्त परिचय है।

इस शतक के विद्वान् लेखक पूज्यचरण स्वनामधन्य प्रो० डॉ० कालिकाप्रसाद शुक्ल जी, जिनकी छत्रच्छाया में रहकर मैंने व्याकरण-शास्त्र का आचार्य तक अध्ययन किया और विद्यावारिधि (पी-एच० डी०) की उपाधि प्राप्त की, उन्हीं के आदेश से 'बहुजनहिताय' 'बहुजनसुखाय' यह शतक भी सर्वजनबोध्य हो तथा इसका लाभ सबको मिल सके इस दृष्टि से 'भास्करी' नामक संस्कृत व्याख्या तथा 'भानुमती' नामक हिन्दी व्याख्या कर मैंने शतक के अभिप्राय को सुगम एवं सामान्य जनों के भी समझने योग्य बनाने का प्रयास किया है। यदि मैं इस प्रयास में थोड़ा भी सफल हुआ और इससे लोक का कुछ कल्याण हो सका या कोई अच्छी बात सामने आ सकी तो वह एकमात्र मेरे पूज्य गुरुदेव के आशीर्वाद का ही फल होगा। ठीक इसके विपरीत यदि परम्परा के विरुद्ध या असम्बद्ध बातें यदि कहीं कुछ आ गयी हों तो उसे मेरी मन्द बुद्धि का दोष समझकर पाठकगण--

स्यादेव मेऽलसतया मतिमान्द्यतो वा
दोषः क्वचित्क्वचिदथापि न कापि शङ्का।
नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते भुवि सज्जनानाम् ॥

इस उक्ति को ध्यान में रखकर मुझे अवश्य ही क्षमा कर देंगे इसी निवेदन के साथ--

सादर--

वनत्रयोदशी, २०४०
सम्पूर्णानन्दसंस्कृतविश्वविद्यालय,
वाराणसी।

डा० गिरिजेशकुमार दीक्षित
अध्यापक, व्याकरणविभाग

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भास्करी-भानुमतीसंवलित-

भास्करभावभानवः

सकलभुवननाथं योगिनामप्यगम्यं
शरणमुपगतानाम् आर्तिनाशाग्रगण्यम् ।
सरलपदनिवेशे भास्करी-भानुमत्यौ
रविसरसिजपादं सन्तनोमि प्रणम्य ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भास्करभावभानवः

(१)

दधानं लोलन्तं नयनसुखदं कुण्डलमणिं
वसानं कौशेयं कनकविशदच्छायरुचिरम् ।
प्रभाते दीव्यन्तं कमनकिरणैर्व्योमपटले
नमामीनं देवं हरिततुरगस्यन्दनरुहम् ॥

भास्करी

नयनामृताञ्जनं चञ्चलं कुण्डलं दधानम्, सुवर्णकान्तिरुचिरं क्षौमं वस्त्रं वसानम्, आकाशतले मनोहरकिरणैः भास्वरम्, हरिताश्वयुक्तं स्यन्दनमारुढं भगवन्तं सूर्यमहं प्रभाते नमामि ॥

भानुमती

प्रातःकाल में नेत्रों को आनन्द देने वाले चञ्चल कुण्डल धारण किये हुए, सुवर्ण के समान चमकता हुआ पीताम्बर पहने हुए, आकाश में मनोहर किरणों द्वारा तेजस्वी, हरे घोड़ों वाले रथ पर बैठे हुए भगवान् सूर्य को मैं प्रणाम करता हूं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२)

करेणैकेनाश्वान् झटिति पथि कामं नियमयन्
परेण श्रेयोदां विगतभयमुद्रां परिवहन् ।
'जहीहि त्वं स्वापं' जनमुपदिशन् कुक्कुटरुतैः
प्रभाते भानुर्नोऽखिलजगति भव्याय भवतु ॥

भास्करी

एकेन हस्तेन अश्वान् मार्गे शीघ्रं योजयन्, द्वितीयेन चाभयमुद्रां प्रदर्शयन्, कुक्कुटशब्दैः 'त्वं निद्रां त्यज, कार्ये व्यापृतो भव' इति जनानुपदिशन् प्रभाते भगवान् भानुरस्माकं कल्याणं करोतु ॥

भानुमती

एक हाथ से घोड़ों की बागडोर पकड़े हुए, दूसरे से अभय मुद्रा दिखाते हुए, 'निद्रा त्यागो, काम में लग जाओ' इस प्रकार मुर्गों के शब्द से प्रातः जनता को उपदेश देते हुए, भगवान् सूर्य हम लोगों का कल्याण करें ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५)

हरे ते पादेभ्यः कमलकुलमासाद्य कमला
हरेर्भूषाभावं भजति भुवनाभोगभर्तुः ।
भवेत् स्निग्धा दृष्टिर्विहितपदपातेषु यदि ते
फलं तस्या ईष्टे सुरपतिगुरुर्नापि गदितुम् ॥

भास्करी

भगवन् सूर्य ! विनाऽऽयासं तव किरणेभ्यः कमलं लक्ष्मीं शोभां प्राप्य जगतो रक्षकस्यापि विष्णोर्भूषणं भवति। अर्थात् सूर्योदये कमलं विकसति। विकसितस्य कमलस्य मालां भक्ताः भगवतः शिवस्य कण्ठे परिधापयन्ति। यदि प्रणन्तुर्भक्तस्योपरि सूर्यस्य स्नेहमयी दृष्टिः स्यात्, तदा तस्याः कीदृशं फलं स्यादिति बृहस्पतिरपि वक्तुं न शक्नोति, का कथाऽन्येषाम् ॥

भानुमती

कमल बिना किसी प्रयत्न के भगवान् सूर्यनारायण के चरण से शोभा प्राप्त कर यदि विष्णु के गले का हार हो जाता है तो उनके चरण को प्रतिदिन प्रणाम करनेवाले पर जो उनकी स्नेहमयी दृष्टि होगी, उसका फल क्या होगा ? यह बृहस्पति भी नहीं बता सकते ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४)

श्रुतेः सारं मन्ये तव चरणरेणुं मुनिनुतं
यदंशानामाप्त्या हरिहरविरञ्चिप्रभृतयः।
जगद्वन्द्या नूनं किमिव मम चित्रं दिनमणे
यदा खद्योतोऽपि द्युतिलवमितः खे विजयते ॥

भास्करी

हे भास्कर! यतो हि तव चरणरेणुर्वेदनिष्कर्षः, अतस्त्वं मुनिभिरपि वन्द्यः। यदि तस्य रेणोरंशं प्राप्य ब्रह्मविष्णुमहेशा जनैर्वन्दनीया भवन्ति तर्हि नात्र किञ्चिच्चित्रम्। यतः खद्योतोऽपि भवतः पादलवं प्राप्य नभसि इतस्ततो निर्द्वन्द्वं विचरति, का कथा पुनर्देवानां ब्रह्मविष्णुमहेशानाम् ॥

भानुमती

हे सूर्य! वेद के सारभूत इसीलिये ऋषियों से भी वन्द्य आपके चरणरज के अंशमात्र से ब्रह्मा, विष्णु, महेश जगत् में बन्दनीय हो गये हैं—इसमें कोई आश्चर्य की बात नहीं है; क्योंकि ये तीनों देव स्वयं बड़े हैं और आपके तेज से इनको और अधिक महत्त्व प्राप्त हो जाता है, किन्तु एक साधारण जुगनू भी आपके थोड़े से तेज के कारण आकाश में स्वच्छन्द उड़ता रहता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९)

मुनीनां तत्तत्त्वं विमलमनसां वीतरजसां
समाधौ दुर्ज्ञेयं विषयविनिवृत्तेन्द्रियगणैः।
तदेवेदं नित्यं विषयविषसन्तप्तमनसा
जनेनाप्तुं शक्यं तव चरणभक्त्या प्रतिपलम् ॥

भास्करी

क्षपितकल्मषैरत एव निर्मलान्तःकरणैर्मुनिभिः विषयवितृष्णैरतीन्द्रियैः समाधौ यद् रवितत्त्वं साक्षात्कर्त्तुं न शक्यते, तदेव तत्त्वं साधारणेन जनेन विषयासक्तमनसाऽपि तव चरणभक्त्या प्राप्तुं शक्यते। (एतेन भक्तेः प्राधान्यं सूचितम्) ॥

भानुमती

शुद्ध अन्तःकरण वाले मुनिलोग जिस रवितत्त्व को समाधि की अवस्था में भी नहीं प्राप्त कर पाते, उसी को साधारण लोग सूर्य की आराधना से सहज ही प्राप्त कर सकते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६)

दयालो भानो त्वं जगत उपकारे विजयसे
निपात्याप्यब्धौ स्वं निशिचरमशोकं वितनुषे।
दिवा तप्तं कामं कुमुदकुलमप्यासुखयसे
प्रजानां भूत्यै स्वं दिशि विदिशि नित्यं भ्रमयसे ॥

भास्करी

कृपालो भानो, त्वमिव जगत उपकारं नान्यो विधातुं पारयेत्। यतो हि त्वं सायमात्मानमपि पश्चिमसमुद्रे निपात्य त्वत्तो भीतान् निशाचरानप्यवसरं प्रदायाशोकान् करोषि। दिवा तव तापात् ग्लानं कुमुदवनमपि विकासयसि। प्रजानां सुखाय दिशि दिशि भ्रमसि ॥

भानुमती

भगवन् ! जगत् के उपकार में तुम से बढ़कर कोई दूसरा नहीं हैं; क्योंकि सायङ्काल तुम अपने को समुद्र में डुबाकर भी तुम्हारे ही भय से दिन में छिपे राक्षसों को भी रात्रि में अपने कार्य सम्पादन के लिए अवसर देते हो, दिन में तुम्हारे ताप से कुम्हलाये कुमुदवन को रात्रि में विकसित करते हो, प्रजा के सुख के लिए प्रत्येक दिशाओं में घूमते रहते हो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७)

सदानन्दं भानोस्तिमिरततिघातं विदधतः
पदाम्भोजं याचे सकलसुरमौलिव्यवहितम् ।
भवाब्धीनां पोतं सकलसुखसारैकनिलयं
तरङ्गे नक्राद्याकुलितभयदे सन्निपतितः ॥

भास्करी

संसारसागरस्य नक्रग्राहादिसंकुले अत एव भीतिकरे तरङ्गे पतितोऽहं सदानन्दं समेषां सुखानामद्वितीयं स्थानं सुरगणैः सदा प्रणतं पोतं तमसां विहन्तुर्भानोश्चरणकमलं प्रार्थये ॥

भानुमती

ग्राह-नाकप्रभृति से व्याप्त, भय देने वाले संसार-सागर की तरङ्गों में बहता हुआ मैं सम्पूर्ण सुखों के आधार, देवताओं के भी प्रणम्य, सदा आनन्द देने वाले, अन्धकार दूर करने वाले सूर्य के पोतभूत चरणकमलों का ध्यान करता हूँ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८)

तमिस्रायां श्राम्यत् स्फटिकमणिसम्भिन्नमुकुटं
सुधाधौतं हर्म्यं शिशिरकरपूतं स्थिरमिदम् ।
प्रभाते स्नातीवारुणकिरणकश्मीरजरसै-
र्विभोर्भानोरर्चा भवति न हि मोघा कथमपि ॥

भास्करी

रात्रिं यावत् तपस्यां कुर्वन्निव स्फटिकमणिनिर्मितः सुधया लिप्तश्चन्द्रकिरणैः पूतः स्थिरोऽयं राजप्रासादः प्रभातेऽरुणकिरणैः कुङ्कुमरजःस्नानं विदधदिव भाति; यतः भगवतः सूर्यनारायणस्यार्चा कदापि विफला न भवति ।।

भानुमती

रात भर अन्धकार में तपस्या करता हुआ, स्फटिकमणि से बने हुए मुकुट वाला, चन्द्रमा की किरणों से पवित्र, स्थिर चूने से पुता हुआ, राजप्रसाद प्रातः केसरयुक्त जलरूप अरुणकिरणों से स्नान करता हुआ लगता है। भगवान् सूर्य की आराधना कभी भी विफल नहीं होती ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९)

अतत्त्वे तत्त्वज्ञः क्षपितकलुषोऽप्यार्षनयनः
सपर्यायै कुन्दं तव चरणयोर्जातिमथवा।
जपापुष्पं मत्वा वितरति महीशोणफलके
विभोर्नायं भानोरतुलमहिमा काव्यविषयः॥

भास्करी

व्यपगतपापोऽतत्त्वेऽपि श्वप्रभृतिजन्तुषु ब्रह्मदर्शकः, (यथाह गीता– 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः') अत एव आर्षदृष्टिस्तत्त्वज्ञो मुनिर्भगवतः सूर्यनारायणस्य पूजनार्थं प्रभातेऽरुणकिरणैः रक्तत्वात् जातिपुष्पं कुन्दपुष्पं च जपापुष्पं मत्वा धरायां ताम्रपात्रे ददाति। भगवतः सूर्यस्य महिमा कविभिर्वर्णयितुमशक्यः॥

भानुमती

तपस्या द्वारा नष्ट पाप वाले आर्षदृष्टि मुनिलोग भी सूर्य की पूजा प्रातः काल सूर्य की लाल किरणों के प्रभाव से अढ़हुल समझकर जूही, चमेली, कुन्दादि फूलों से करते हैं। भगवन्, तुम्हारे माहात्म्य का वर्णन कोई कवि भी नहीं कर सकता है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०)

पुरन्ध्रीणां केशान् कनककपिशान् संविदधतः
घनीभूतं ध्वान्तं गगनशुषिरे लीनमभितः।
प्रदीप्तास्ते दिव्या दिनमणिकरा घ्नन्ति सततं
प्रभावो दूरेऽपि प्रबलमहसः शत्रुशमनः ॥

भास्करी

अत्यन्तं तेजस्विनः सूर्यकिरणा रामाणां तमालनीलानपि केशान् सुवर्णवर्णान् कुर्वन्तः आकाशबिलेऽपि लीनं तमो नाशयन्ति। तेजस्विनो दूरेऽपि स्थितः प्रभावः शत्रून् नाशयति ॥

भानुमती

अत्यन्त तेजस्वी आपकी किरणें स्त्रियों के काले केश को सुनहला बनाते हुए आकाशविवर में छिपे अन्धकार को दूर कर रही हैं। तेजस्वियों का प्रभाव दूर से भी शत्रु का नाश कर देता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(११)

क्रूरैर्विश्वाशाटैर्निशि रहसि निक्षेपनिरतं
शशाङ्कं निश्शङ्कं जलधितलयन् हन्त सहसा ।
श्रियं प्रातर्दिव्यां कुमुदवनिताकान्तवदनात्
प्रयच्छन् पद्मिन्यै खरकिरण खे त्वं विजयसे ॥

भास्करी

नक्तं पृथिव्या एकान्ते तमश्शाटिं करैः दूरयन्तम् अर्थात् महाजनोचित-विरुद्धमाचारं विदधतं चन्द्रं निश्शङ्कं पश्चिमतोयनिधौ क्रुधा निक्षिपन् प्रातः कुमुदिनीनां मुखस्य कान्तिं पद्मिन्यै प्रयच्छन् च रविर्नभसि विचरणरूपं समुचितकर्मफलं प्राप्नोति ॥

भानुमती

रात्रि में एकान्त होने पर पृथिवी की नील शाटी रूप अन्धकार को दूर करने वाले पापाचारी चन्द्रमा को निश्शङ्क होकर पश्चिम सागर में डुबाते हुए, तथा उनकी प्रियकुमुदिनी की कान्ति को छीनकर अपनी प्रिय कमलिनी को देकर भगवान् सूर्य नारायण आकाश में सुशोभित हो रहे हैं ॥
भी अच्छा नहीं होता ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१२)

खगोऽसौ धन्यो यो रटति विरहे सूरमनिशं
समीपे तिष्ठन्तं प्रियजनमनादृत्य निशि यम् ।
तमेवं चिद्रूपं जगदुपकृतौ दत्तसमयं
समर्चन् ना नित्यं क्षपयति न संसारविपदम् ॥

भास्करी

भगवन्, चक्रवाकस्त्वद्वियोगे समीपे वर्तमानया प्रिययाप्यव्याहरन् निशां यावत् सततं त्वामेव रटति । विहङ्गोऽपि त्वन्माहात्म्यं जानातीत्यर्थः । किन्त्वाश्चर्यमिदं यन्मनुष्यः सन्नपि जगदुपकारनिरतं चिद्रूपं त्वां पूजयन् स्वसंसारविपदं न नाशयति ॥

भानुमती

हे सूर्य, तुम्हारे वियोग में चक्रवाक पक्षी रातभर अपनी प्रिया की भी उपेक्षा कर निरन्तर तुम्हारा ही नाम रटता है । किन्तु आश्चर्य यह है कि मनुष्य जगत् के उपकार में लगे हुए ज्ञानस्वरूप तुम्हारी पूजाकर अपने को संसार-जाल से मुक्त नहीं करता ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१३)

सहस्रांशुत्वं ते वनजवनमाख्यातु भगवन्
यतो भित्त्वा कोशं गमयसि निबोधं त्वमिन तत् ।
प्रवादोऽयं लोके कियदवधि संमोहयतु नृन्
निराकर्तुं सऽज्जोऽनपगततमा अस्मि तमहम् ॥

भास्करी

भगवन् ! त्वं सहस्रकिरणोऽसीति कमलवनं प्रतिजानातु, यतो हि ग्रन्थि भित्त्वा तस्मै प्रबोधं प्रदत्तवान् । किन्त्वयं प्रवादो मनुष्यान् चिरं मोहयितुं नालं भविष्यति । यतो हि ममान्धकारोऽद्यापि न व्यपागमत् । अतोऽहं तं निराकर्त्तुं सज्जोऽस्मि ॥

भानुमती

भगवन्, तुमको कमल भले ही सहस्ररश्मि कहें, क्योंकि तुमने उनकी ग्रन्थि का भेदन किया है । किन्तु यह प्रवाद जगत् में कब तक टिकेगा ? क्योंकि मेरा मोह आजतक समाप्त नहीं हुआ । अतः मैं उसका खण्डन करने के लिए प्रयत्नशील हूं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१४)

दयादाक्षिण्यं ते लसति जगतीभालपटले
यतः सर्वो लोकस्त्वयि समुदिते बोधमयते ।
इदानीं घोरे त्वां वृजिनवदने सन्निपतितो
दयालुं पापघ्नं शरणमभियाचामि तरणे ।।

भास्करी

सूर्य ! ते दयालुता समस्तेऽपि जगति विलसति । यतोहि त्वय्युदित एव सर्वोऽपि जनः प्रकाशं प्राप्नोति । अन्यथाऽन्धकारे निमग्नः किंकर्त्तव्यविमूढो लक्ष्यते । परन्तु अद्याप्यहं पापमुखे मग्नः क्लेशनाशकं त्वामेव शरणं याचे ॥

भानुमती

हे सूर्य, तुम्हारी दयालुता सम्पूर्ण जगत् में प्रसिद्ध है । क्योंकि तुम्हारे उदय होते ही सभी लोग अपने-अपने कार्य में लगते हैं । किन्तु इस समय भी मैं पाप के मुख मे पड़ा तुम्हारी शरण की याचना करता हूं ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१५)

दशां दर्शं दर्शं कुमुदसरसः प्रत्यहमहो
उलूकानां दीनां विटपिविवरं च श्रितवताम् ।
मनो नो संशेते प्रभवति रवेरेष महिमा
प्रतीपत्वं प्रायः प्रबलमहसां तापजनकम् ॥

भास्करी

भास्करोदयात् परतः कुमुदसरोवरस्य, तरूणां कुलायेष्वात्मानं गोपयतां कोशिकानां च दीनां दशां दर्शं दर्शं ममैवं निश्चयो भवति यद् भगवतः सूर्यनारायणस्यैवेदं माहात्म्यं लोके प्रभवति; यतः प्रकृष्टतेजसां विरोधो निश्चयेन सन्तापजनको भवति ॥

भानुमती

सूर्योदय के पश्चात् कुमुदसरोवर की, तथा वृक्षों के कोटरों में छिपे उल्लुओं की दीन दशा देखकर मेरे मन में यही निश्चय होता है कि यह सब सूर्य के प्रभाव से हो रहा है। यतः बड़े लोगों से विरोध करना विपत्ति को आमन्त्रण देना है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१६)

मनः कृत्स्नाद् बाह्याद् विषयविषवृन्दादनुदिनं
विकृष्याधायान्तर्विहितजपयोगाः पुलकिताः ।
समाधौ निर्बाधे दधति यमवन्तो निरुपमं
यमानन्दं नित्यं स च निगमितो वासरमणिः ॥

भास्करो

यमनियमस्वाध्यायनिरता अत एव प्रसन्ना मुनयो बाह्येभ्यो विषयेभ्यो मनोऽन्तर्निधायाखण्डे समाधौ यमानन्दमनुभवन्ति, वेदप्रतिपाद्यः स आनन्दः साक्षाद् दिनमणिरेव ॥

भानुमती

शमदमादि से युक्त अतएव प्रसन्नचित मुनिजन बाह्य-विषयों से अपने मन को अन्तर्निरुद्ध कर अखण्ड समाधि में जिस आनन्द को प्राप्त करते हैं, वह आनन्द सूर्य ही है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१७)

सरोजिन्या वक्त्रं करकिसलयैः संविशदयन्
निशानाथाद् भीत्या मृदुदलपटे लीनमभितः ।
यशः शृण्वन् स्वीयं भ्रमरकुलसंगीतममलं
द्रुतत्वं यातीनो द्रवति न मनः कस्य यशसा ॥

भास्करी

चन्द्रमसो भयात् मृदुनि दलपटे गुप्तं सरोजिन्या आननं करकिसलयैः लालयन्, मधुकरकुलगीतं स्वीयं यश आकर्णयन् भगवान् भास्करः सर्वत्र प्रसरति । स्वयशसा कस्य मनो न प्रसीदति । (नक्तं कमलिनी संकुचति, प्रातर्विकसति, भ्रमराश्च तत्र क्रीडन्ति) ॥

भानुमती

चन्द्रमा के भय से रात्रि में अपने पत्तों से छिपाये कमलिनी के मुख को भगवान् सूर्य अपने हाथों से सँवारते हुए, मधुकरों द्वारा गाये जा रहे अपने यश का श्रवण करते हुए तेजी से चारों तरफ फैल रहे हैं; क्योंकि अपना यश किसको द्रवित नहीं करता ? ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१८)

समन्ताद् विस्तीर्णं रविकिरणजालं क्षितिरुहो
दधानाः काषायं वसनमभितो योगिन इव ।
सहस्रांशुं स्वान्ते दधति खगपादैरपि दृढा
अरागा अप्येते रविपदयुगे सक्तमनसः ॥

भास्करी

प्रातः समन्ताद् विस्तुतं रवेः किरणसमूहं योगिन इव वृक्षाः काषाय-वस्त्रं परिदधतः क्षुद्राणां खगानां पादैराहता अपि धैर्यशीलाः सन्तो भानुमन्तं हृदये ध्यायन्ति । वैराग्यभाजोऽप्येते तरवो रविपादेष्वासक्ता इत्याश्चर्यस्य परा काष्ठा ॥

भानुमती

योगियों की तरह वृक्ष भी प्रातः चारों तरफ फैले सूर्य की किरण को काषाय वस्त्र के रूप में धारण करते हुए, पक्षियों के चरण से अपमानित होने पर भी अपने स्थिर हृदय में सूर्य का ध्यान करते हैं। यद्यपि ये वृक्ष विरक्त हैं, तथापि सूय के चरणों में अनुरक्त हैं। यह महान् आश्चर्य की बात है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१९)

नभोऽर्घे प्राग् दत्ते तिमिरततिदूर्वाक्षबलिता-
नखण्डान् व्रीहींस्तान् विशदभगणान् विश्रुतिरवैः ।
ततो भोज्ये भानोः शिशिरपृषतान् स्वादुपृथुकान्
महान्तस्त्वर्च्यानां जहति न सपर्यां क्वचिदपि ॥

भास्करी

सूर्योदयकाले सर्वतः प्राक् नभस्तमस्तति दूर्वां विशदनक्षत्रगणान् अक्षतान् पक्षिगणानां शब्दैः भगवते सूर्यायार्घभूतान् समर्पयति । ततो निशि पतितान् शिशिरबिन्दून् स्वादु चिपिटान् ददाति । महान्तोऽपि महतामर्चामवश्यं कुर्वन्ति । (अन्यत्रापि अर्घ्ये दूर्वाक्षतफलानि वेदवचनैः प्रदीयन्ते । भोजने च समीचीनं वस्तु प्रदीयते) ॥

भानुमती

सूर्योदयकाल में आकाश भगवान् सूर्य के अर्घ्य के लिए अन्धकार को ही दूर्वा के रूप में तथा ताराओं को अक्षत के रूप में पक्षिसमूहों के कलकल निनाद स्वरूप वेदवचनों को प्रदान करता हैं । पश्चात् रात्रि में गिरे ओस-कणों को चिउड़ा के रूप में देता है । यतः बड़े लोग भी बड़ों की पूजा का अतिक्रमण नहीं करते ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२०)

उषां लाजानग्नावुडुगणमयान् भास्करकरे
क्षिपन्तीं सोल्लासं द्विजवररवैर्वेदवचनैः ।
पुरन्ध्रीणां गीतैः समदपिकगीतैः श्रुतिसुखै-
र्वरो भाति व्रध्नः कमलदलहासैः परिणयन् ।।

भास्करी

भास्करकरे वह्नौ नक्षत्रगणानेव लाजान्, पक्षिरवैरेव वेदवचनैः,कोकिल-मधुरशब्दैरेव स्त्रीणां मङ्गलगीतैः सोल्लासं निक्षिपन्तीमुषसं वररूपो भास्करः कमलानां विकासैरेव हासैः परिणयति। (अन्यत्रापि विवाहे लाजा-होमो भवति, वरहस्ते कन्या लाजां ददाति, विप्राश्च वेदं पठन्ति, रमण्यश्च गीतं कुर्वन्ति, सुहृदश्च हास्यं कुर्वन्ति) ।।

भानुमती

प्रातःकाल सूर्य की किरणरूप अग्नि में नक्षत्रों को लाजारूप में, पक्षियों के कलकलस्वरूप वेदवचन द्वारा कोकिलशब्दरूप स्त्रियों के मधुर गीतों से आहुति करती उषा से भगवान् सूर्यनारायण विवाह करते हैं। उस समय कमलों का खिलना मित्रों का आनन्द-हास है ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२१)

करैः कञ्जैर्मालां प्रकृतिविदुषी सौरभभरां
भ्रमद्भृङ्गां रम्यां विविधसुमसज्जां पुलकिता ।
नमद्वल्लीव्याजप्रणतिमतिभक्त्या विदधती
पिधत्ते साकूतं प्रियवरवधूकण्ठफलके ॥

भास्करी

मधुकरास्वाद्यमानरसामत एवातिसुरभिरमणीयां स्थाने-स्थाने सुमनोऽन्तरगुम्फितां कमलमालां नम्रव्रततिव्याजेन प्रणामं विदधती प्रसन्ना प्रकृतिरतिप्रेम्णा वरवध्वोः सूर्योषसोः कण्ठे साभिप्रायं पिदधाति । अलौकिकस्यार्चामलौकिक एव कर्त्तुं शक्नुयात् ॥

भानुमती

प्रकृति, मधुकरों द्वारा जिसका रसास्वादन किया जा रहा है इसीलिए अत्यन्त सुगन्धित मनोहर, बीच-बीच में अन्य पुष्पों से गुंथी हुई कमल की माला, वर-वधू के रूप में सूर्य और उषा को, लटकी हुई लताओं के बहाने प्रणाम करती हुई पहनाती है । लोकोत्तर की अर्चना लोकोत्तर ही कर सकते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२२)

तमीड्यं नौमीनं प्रकृतिकृपणः क्लान्तधिषणो
निलिम्पैर्निर्गीतं निगमगदितैः साधुवचनैः ।
यतः कृत्स्नो भव्यो जननमरणादीनि लभते
जगन्मूले भानावविरलनतिः कस्य न भवेत् ॥

भास्करी

अमराः श्रुतिप्रतिपादितैः समर्थवचनैर्यं स्तुव तं सूर्यं प्रकृत्या कृपणो बुद्धिहीनोऽप्यहं प्रणमामि । यस्मात् भास्करात् सर्वोऽपि जीवलोको जनन-मरणादीनि लभते । जगत्कारणे भगवति भास्करे कस्य नतिर्न भवेत् ॥

भानुमती

वेद के समर्थ वाक्यों से देवतालोग जिसकी स्तुति करते हैं, उस सूर्यनारायण की मैं अज्ञ अपने अटपटे वचनों से स्तुति कर रहा हूं। जिससे सम्पूर्ण चराचर जगत् जन्म-मरणादि प्राप्त करता है। संसार के मूल कारण भगवान् सूर्य में किसकी रति न होगी ? ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२३)

प्रमोदं निर्भेदं वनजवनराजिर्विकसिता
प्रभाभिः सन्तापं कुमुदकुलमाप्तं च सततम् ।
समानः सद्भावो यदपि सवितुः सर्वभुवने
तथापि स्वादृष्टाद् विविधफलभाक्त्वं जनिमताम् ॥

भास्करी

प्रातर्विकसितं कमलकुलं प्रभूतमानन्दमाप्नोति, कुमुदकुलं च प्रभूतं सन्तापमवाप्नोति । यद्यपि भगवतः सूर्यस्य समानः स्नेहः सर्वस्मिन् भवति, तथापि स्वस्वादृष्टवशात् सर्वोऽपि जनः तत्तत्फलं प्राप्नोति ॥

भानुमती

प्रातः सूर्योदय के समय कमल अत्यन्त आनन्द का अनुभव करते हैं, और कुमुदकुल प्रभूत सन्ताप का । यद्यपि सूर्य का स्नेह सब पर समान रहता है किन्तु अपने अपने अदृष्ट से सब लोग भिन्न-भिन्न फल पाते हैं ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२४)

सरित्तीरे रम्ये कनककिरणच्छायकलिते
तवाङ्घ्रिं संस्पृश्य प्रणतिततिपातं विदधतः ।
अये छायानाथ त्रिभुवनमणे वारिजपते
दयस्वेत्याख्यातो विलयमयतां मेऽघनिकरः ॥

भास्करी

कनकपिशेऽतएव मनोहरे नद्यास्तीरे प्रणिपातपुरस्सरं प्रणामं विदधतस्तव पदकमलं संस्पृश्य 'हे दिनमणे ! हे त्रिभुवनपते ! हे कमलपते ! मम दयस्व' इति दीनं वचः कथयतो मेऽघानां विलयो भवतु ॥

भानुमती

सुनहले मनोहर नदी के तट पर साष्टाङ्ग प्रणाम करते हुए तुम्हारा पैर पकड़कर 'हे छायानाथ ! हे त्रिलोकपति ! हे कमलनाथ ! मुझ पर दया करो' यह कहते हुए मेरा पापसमूह नष्ट हो जाय ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२९)

दिशं प्राचीं कान्तां करकिसलयै रागललितः
समाश्लिष्य प्रेम्णा विरहपरितापं परिहरन् ।
विकासैः कञ्जानां मधुकरकुलं चापि मदयन्
अहो भास्वान् भाति प्रकटविभुतो लोकमहितः ॥

भास्करी

स्वभामिनीं पूर्वां दिशं करैः प्रोत्याऽऽलिङ्गन् विरहतापं परिहरन् कमलानां विकासं विधाय मधुकरकुलं प्रमोदयंश्चार्घ्यादिना लोकपूजित-विश्वविख्यातोऽनुरक्तश्च भगवान् भास्करः प्रातर्भाति ॥

भानुमती

अपनी प्रिया पूर्व दिशा का अनुरागपूर्वक आलिङ्गन कर, उसके विरहताप को दूर कर, कमलों के विकास से भ्रमरों को आनन्दविभोर करते हुए प्रसिद्ध सामर्थ्यशाली, इसीलिए संसार से पूजित भगवान् भास्कर प्रातःकाल सुशोभित हो रहे हैं ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२६)

जनानामार्त्तानां विहिततपसा भक्तिनमतां
द्रुतं दूरीकुर्वन् दुरितततिमंशोः समुदयैः ।
तमोराशिं भिन्दन्नुदयगिरिलक्ष्मीं विशदयन्
उदेति द्यां भानुः कनकमयरागैः कपिशयन् ॥

भास्करी

तपस्विनां भक्त्या प्रणमतां दीनानां दुरितानि शीघ्रं किरणसमुदायैः नाशयन् तमांसि भित्त्वा सुमेरोः शोभां वर्द्धयन् कनककिरणैराकाशं रञ्जयन् भगवान् सूर्य उदेति ॥

भानुमती

भक्ति से नम्र तपस्वियों के पाप को अपनी किरणों से शीघ्र नष्ट कर, अन्धकार का भेदन कर, सुमेरु की शोभा बढ़ाकर, सुनहरी किरणों से आकाश को अनुरञ्जित करते हुए सूर्योदय हो रहा है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२७)

जनानां क्षेमार्थं प्रकृतिपरिचर्यार्थमथवा
त्वदालम्बस्य त्वं जगदुदधिमध्ये निपततः ।
प्रसादस्योद्धारे दृढकृतपरिकरो वार्द्रहृदयो
रवे ! धावन् वार्धेरुदयगिरिमौलिं तु भजसे ॥

भास्करी

हे सूर्य, जनानां बोधप्रदानेन कल्याणार्थं प्रकृतेरनुनयार्थं जगदुदधौ निमज्जतः शतकलेखकस्य प्रसादस्योद्धारार्थं च दयार्द्रहृदयो दृढपरिकरस्त्वं पश्चिमसमुद्राद्धावन् सुमेरुशिखरमारोहसि ॥

भानुमती

हे सूर्य, लोगों के कल्याण के लिए, प्रकृति के अनुरञ्जन के लिए, अथवा संसार-सागर में डूबते हुए इस शतकलेखक भक्त के उद्धार के लिए तुम पश्चिम समुद्र से दौड़ते हुए सुमेरु के शिखर पर आरूढ़ होते हो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२८)

तमिस्रासन्तप्तां प्रियविरहजन्याश्रुवदनां
तपस्यन्तीं देवीमुषसमतिविस्तीर्णचिकुराम् ।
करैरामृष्य स्वैः कनकमयशाट्या विशदयन्
सुबिम्बात् सौभाग्याद् विरहितललाटां तिलकयन् ॥

भास्करी

रात्रौ सूर्यस्य विरहेण सन्तप्तां रुदितमुखीमत एव विशकलितवेणिं तपस्यन्तीं देवीमुषसं स्वकनककिरणकरैरामृष्य सुवर्णवर्णशाट्या संयोजयन् सौभाग्यबिन्दुबिम्बतः तस्या विरहितललाटं च तिलकयन् रविः सुमेरु-शिखरं यातीति पूर्वेण सम्बन्धः ॥

भानुमती

रात्रि में प्रियतम सूर्य के विरह में सन्तप्त आंसू से व्याप्त मुख वाली, बिखरे केशवाली, तपस्या-मग्न उषा को सुनहरी साड़ी पहना कर सौभाग्य चिह्न से शून्य ललाट मे बिम्बरूप सौभाग्य-चिह्न लगाते हुए सूर्य उदित हो रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(२८)

प्रभूतं पुण्यं किं सकलभुवनानां समुदितं
अयःपिण्डं बिम्बं खगमिथुनसन्तापजनितम् ।
प्रतप्तं पद्मिन्या हृदयनवरागैः सुरपते-
र्दिशायाः सौभाग्यं सुरगिरिविरूढं विजयते ॥

भास्करी

प्रभाते विलोक्यमानं बिम्बं सकलभुवनानां समुदितं प्रचुरं पुण्यम्, उत चक्रवाकमिथुनसन्तापजन्यतप्तायःपिण्डम्, उत पूर्वस्या दिशः सौभाग्यम् सम्प्रति सुमेरुशिखरे विजयते ॥

भानुमती

सकल विश्व का एकत्र हुआ प्रचुर पुण्य, अथवा चक्रवाकदम्पती का अत्यन्त तपा लोहपिण्ड, या पद्मिनी के हृदय का अनुराग, अथवा पूर्व दिशा का सौभाग्य-सिन्दूर रूप बिम्ब सुमेरु के शिखर पर खेल रहा है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३०)

सतत्त्वं शास्त्राणां विमलतपसां पुण्यमथ वा
त्रिलोक्याः सौभाग्यं गतमुपचितिं मूर्त्तमथ वा।
महातेजो विष्णोः सकलसुरसंगीतमनिशं
दुराधर्षं भानोर्मलममलबिम्बं शमयतु ॥

भास्करी

इदं पुरो दृश्यमानं निर्मलं बिम्बं शास्त्राणां तत्त्वम्, अमलान्तःकरणानां तपोजन्यं पुण्यम्, त्रिलोक्याः वृद्धिं गतं सौभाग्यम्, अथवाऽनिशं सुरगणगीत विष्णोर्दुराधर्षं तेजो मलं शमयतु ॥

भानुमती

शास्त्रों का निष्कर्ष, तपस्वियों का पुण्य, मूर्त्त त्रिलोकी का बढ़ा हुआ सौभाग्य, देवों द्वारा प्रशंसित अतिरस्कृत विष्णु का यह निर्मल तेज मेरे पाप को दूर करे ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३१)

भजन्त्येके शम्भुं शशिललितभालं दिनमणे
तथान्ये सेवन्ते दलितमुरगवं मधुपतिम् ।
अहं तु त्वत्पादाश्रयणदलिताशेषकलुषो
भवज्वालाजालं तुहिनकरसारं हि कलये ॥

भास्करी

हे तरणे ! केचन विचारकाश्चन्द्रशेखरं केचन च दलितमुरगवं विष्णु-मुपासते, अहं तु तव पादसेवया क्षपिताखिलपापो जगतो ज्वालातापं तुहिनमिव मन्ये ॥

भानुमती

हे सूर्य ! कुछ विद्वान् चन्द्रमा से भूषित भाल वाले शम्भु की तथा कतिपय भक्त मुरराक्षस के हन्ता कृष्ण की उपासना करते हैं । मैं तो आपके चरण की सेवा द्वारा सम्पूर्ण पाप नष्ट कर इस संसार की ज्वाला को मधुर शीत मानता हूँ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३२)

तमो भिन्दन् पादैरुदयगिरिगर्वं विदलयन्
दिशः प्राच्या वामं वदनविधुभालं पिशुनयन् ।
द्विजालीनामर्घ्यं कमलदलगन्धं सफलयन्
धरां धाम्ना सिञ्चन् विमलकरभानुर्विजयते ॥

भास्करी

पादैस्तमो नाशयन्, उदयगिरेरौन्नत्यगर्वं विध्वंसयन्, प्राच्या दिशो मनोहरं भालं प्रकाशयन्, कमलैः सुरभि द्विजातिभिः प्रदत्तमर्घ्यं सफलयंश्च निर्मलकिरणो भानुः पृथिवीं तेजसा लिम्पन् शोभते ॥

भानुमती

अन्धकार को पैरों से कुचलते हुए, उदयाचल की ऊँचाई के गर्व का ध्वंस करते हुए, प्राची दिशा के सुन्दर भाल को प्रकाशित करते हुए और भक्तों द्वारा प्रदत्त कमल पुष्प सहित अर्घ्य को स्वीकार करते हुए भगवान् भास्कर पृथिवी को अपने तेज से सुशोभित कर रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३३)

अरण्यानीप्रान्ते सघनगिरिकुञ्जेषु किरणाः
प्रकीर्णाः संकीर्णच्छदविवरमार्गेषु सततम् ।
किरातैश्चीयन्ते रविमणिधिया मोघकृतिभि-
र्जनाः प्रायो रागैरुपहृतधियस्तत्त्वकृपणाः ॥

भास्करी

घोरेऽरण्ये पर्वतगह्वरे संकीर्णपत्रविवरे प्रकीर्णाः किरणाः निष्फलप्रयत्नैः किरातैः माणिक्यधिया चीयन्ते। रागैरुपहृतधियो जनास्तत्त्वनिश्चयेऽसफला एव भवन्ति ॥

भानुमती

सूर्य की किरणें घोर जङ्गलों, पर्वत की कन्दराओं तथा घने पत्तों के विवरों में फैली हुई हैं, उन्हें माणिक्य मणि समझकर किरात एकत्र करने का असफल प्रयत्न करते हैं। प्रायः रागी लोग तत्त्वनिर्धारण में सर्वथा अक्षम होते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३४)

सुखं पीते कान्तैरधरधरबिम्बे रतिविधौ
सुमेरौ सुप्तानाममररमणीनामुदयते ।
रवौ रागान् म्लानानरुणकरजालैररुणयन्
महात्मा माध्यस्थ्यादविकृतमना भाति भुवने ॥

भास्करी

सुमेरौ रतिकाले कान्तैः कामं पीते अधरे सुखं सुप्तानाममरवनितानां म्लानान् रागान् अरुणकिरणैरुद्दीपयन् भानुरुदयते । नन्वेवं महात्मनश्चरित्रं दुष्येत ? न; महात्मा तटस्थभावेनाविकृतमनाः कार्यं सम्पादयति ॥

भानुमती

सुमेरु पर्वत पर रतिकाल में कान्तों द्वारा अधरपान करने पर आराम से सोयी हुई दिव्याङ्गनाओं के मलिन राग को पुनः अधिक दीप्त करते हुए सूर्य उदित हो रहे हैं। ऐसा करने पर भी उनके चरित्र पर कोई आंच नहीं आती, क्योंकि महात्मा लोग सभी कार्य तटस्थ भाव से करते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३५)

प्रियामाभां दिव्यां सकलनिशि संसेव्य परित-
स्तदालिज्योत्स्नाया अनुनयमनादृत्य शतशः।
उलूकं योगस्थं विदधदिव मित्रं दिनमणि-
स्तमोराशिं दग्धुं ज्वलनमतिगोलं वमति किम् ?॥

भास्करी

मनोहरां प्रियामाभां रात्रिं यावत् संसेव्य तदालेर्ज्योत्स्नाया अनेकाननुनयाननादृत्य, अर्थात् तत्सङ्गं परित्यज्य, सुहृदिव उलूकं वृक्षकोटरे ध्यानस्थं कुर्वन् सूर्योऽन्धकारं प्रज्वालयितुं वह्नेर्गोलं वमति किं ? (अत्र बिम्बं वह्निगोलत्वेनोत्प्रेक्ष्यते)॥

भानुमती

अत्यन्त सुन्दरी प्रिया आभा के साथ रात्रिभर निवासकर उसकी प्रियसखी चाँदनी के अनुनय को हृदय में स्थान न देकर, मित्र की तरह उलूक को समाविस्थ कर, अन्धकार को जलाने के लिये सूर्य अग्नि की ज्वाला उगल रहे हैं क्या ? (यहाँ सूर्य के बिम्ब की अग्नि ज्वाला के रूप में उत्प्रेक्षा की गयी है)॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३६)

हतस्वाध्यायानाममलमनसां शान्तवचसां
विषीदन्तीमालिं गुरुकुलबटूनां व्रतधियाम् ।
तमिस्राकालुष्याद् विपिनमृगवासं विदधतां
प्रसादं निर्बाधं रविरधिनयन् खे विजयते ॥

भास्करी

ब्रह्मचर्यव्रतधारणं कुर्वतां निर्मलान्तःकरणानां वने मृगैः सह निवसतां तमिस्राकालुष्याद् वेदपाठविरतानामत एव शान्तवचसां गुरुकुलवासिनां ब्रह्मचारिणां समूहं प्रसादयन् सूर्य आकाशे विजयते। ('नक्तं न प्रब्रूयात्' इति निषेधात् वेदपाठविरतानां बटूनां श्रुतिध्वनिः प्रभाते श्रूयते) ॥

भानुमती

रात्रि में वेदपाठ न करने वाले आश्रम के ब्रह्मचारियों की टोली को मुखरित करते हुए सूर्यनारायण आकाश में शोभित हो रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३७)

मनाक् पादस्पर्शात् तव जलजपुञ्जं विकसितं
तदा मन्ये हेतुं निशि पयसि शोकेन गलितम् ।
विपज्ज्वालाजीर्णे मम मनसि जन्मप्रभृति यद्
विकासो नैवाभूत् किमिह विषमं नास्ति भगवन् ॥

भास्करी

भगवन् सूर्य ! रात्रौ तव विरहजन्यशोकतप्तं कमलकुलं प्रभाते मनाक् किरणस्पर्शात् विकासमेति, किन्तु जन्मप्रभृति विपज्ज्वालाजीर्णे मे मनसि विकासो नाभूत् । इह विषमं नास्ति किम्,? ॥

भानुमती

भगवन् सूर्य, रात्रि में तुम्हारे विरहजन्य शोक से तप्त कमल प्रातः काल तुम्हारी थोड़ी सी किरणों के स्पर्श से शोक से मुक्त हो जाता है अर्थात् खिल उठता है; किन्तु जन्म से ही विपत्ति ज्वाला में जलते हुए मेरे मन को जरा भी शान्ति नहीं मिली, क्या यह तुम्हारी दृष्टि में वैषम्य नहीं है ? ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३८)

गुरूणामर्चा न प्रथमवयसीनाचरितवान्
द्वितीये चोन्मादाद् विषयविषमोहे निपतितः ।
न चोपेतश्श्रद्धां तव पदि तृतीये श्रुतिनुते
वदेदानीं तुर्ये शरणमभियास्थामि कमहम् ॥

भास्करी

वयसि प्रथमे गुरवो नोपासिताः, द्वितीये चोन्मादात् विषया उपासिताः, तृतीये च श्रुतिस्तुते तव पदे श्रद्धा न प्रदर्शिता, भगवन् सम्प्रति चतुर्थेऽशरणः कं शरणं यामीति त्वमेव वद ॥

भानुमती

प्रथमावस्था में गुरुसेवा द्वारा विद्या नहीं प्राप्त की, द्वितीयावस्था में विषयों के जटिल जाल में फंसा रहा, तृतीय में तुम्हारे चरणों में श्रद्धा नहीं व्यक्त की, भगवन्! तुम्हीं बताओ कि अब इस चतुर्थावस्था में मैं अशरण किसकी शरण लूं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३९)

पदं मेरोर्मूर्ध्नि द्रुततरमभिन्यस्य वियतः
करैरुग्रैर्भास्वांस्तिमिरततिकेशान् हि विततान्।
क्रुधा कर्षन्नुच्चैरुरसि च पदं हन्त तनुते
विभोः कर्मानार्यं न च विषहतेऽप्यार्यचरितः॥

भास्करी

सूर्यो मेरोः शिरसि पादं न्यस्य शीघ्रं नभसः प्रसृतान् तमः-केशान् कठोरैः करैः क्रुधा कर्षन् उरसि पादं निधत्ते। आर्यचरितो विभोरप्यनार्यं कर्म न सहते, किमुत साधारणस्य जनस्य॥

भानुमती

सूर्य सुमेरु के मस्तक पर अपना पैर रखकर आकाश के अन्धकार रूप केशों को कठोर हाथों द्वारा क्रोध से खींचते हुए उसके कलेजे पर पैर रखते हैं। (यह मध्याह्न सूर्य का वर्णन है।) आर्यचरित सामर्थ्यशाली के भी अनार्य चरित को सहन नहीं करते॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४०)

स्त्रियो बाला वृद्धा निशिचरकुलस्यापि सहसा
श्रिता ध्वान्तैः शीघ्रं निविडवनमूलानि सभयाः।
निलीना उद्विग्ना शिखरिशिखरे कौशिकघटा
बशान्ता हि क्षुद्राः शुचिचरितमाहात्म्यविभवैः॥

भास्करी

रजनीचराणां बाला वृद्धाः स्त्रियश्च भीत्या तमसावृतानि अरण्यानी-गह्वराणि श्रिताः, पर्वतकन्दरेषूलूका विलीनाः। पवित्रचरितानां प्रभावैः क्षुद्राः प्रायोऽशान्ता भवन्ति॥

भानुमती

रात्रि में स्वच्छन्द विचरण करने वाले तुम्हारे भय से अत्यन्त अन्धकारयुक्त जङ्गलों में छिप गये। उलूक पक्षी भी पर्वतों की कन्दराओं में विलीन हो गये। समुज्ज्वल चरित्रवालों के प्रभाव से क्षुद्र लोग प्रायः अशान्त ही रहते हैं॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४१)

मुनीनां सिद्धानां जपनियमसारे समुदिते
महापापाचारा दिशि विदिशि लीना दिनमणौ ।
बटूनां स्वाध्यायध्वनिमुखरितं वैदिककुलं
तमोभिः संरुद्धाः पथिकजनसङ्घाश्च मुदिताः ॥

भास्करी

सिद्धानां मुनीनां तपस्सारभूते सूर्ये समुदिते पापाचाररतास्तत्तद्दिशि विलीनाः, ब्रह्मचारिणां वेदपाठेन वैदिकानां कुलं मुखरितम्, अन्धकारैर्व्याकुलाः पथिका मोदमुपगताः ॥

भानुमती

महात्माओं की तपस्या के निष्कर्ष सूर्य के उदय होने पर पापात्मा [illegible] छिप गये, ब्रह्मचारियों के वेदपाठ से आश्रम मुखर हो उठे और [illegible] में डूबे हुए यात्री प्रसन्न हो गये ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४२)

उषा नव्या भव्या कनकवसना कुन्ददशना
महोल्लासं हासं कमलकुसुमानां विकसनम्।
द्विजालीनां रावं मृदु मृदु तु गीतं विदधती
सपर्यायां भानोर्विविधविधिमह्वाय तनुते ॥

भास्करी

सूर्योदये संवृत्ते कुन्ददशना कनकवसना कमलानां विकासव्याजेन हसन्ती, पक्षिणां ध्वनिव्याजेन मधुरं गीतं विदधती नव्या भव्या उषा भानोः सपर्यायामनेकान् भावान् झटिति तनोति ॥

भानुमती

समुज्ज्वल कुन्द पुष्प के समान दाँतवाली, सुनहरे वस्त्रों से युक्त युवती उषा कमलों के विकास के बहाने से हंसती हुई, पक्षियों के शब्दव्याज से मधुर गीत गाती हुई भानु की उपासना में अपने विविध भावों को प्रकट करती है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४३)

पयोभिर्नाद्येयैः प्रकृतिरनुकूला पदयुगं
सरोजैः सम्भिन्नैः करकिसलयैरर्चति शनैः।
परागैः पुष्पाणां मृदुसुरभिभिर्देवकुसुमै-
र्विलिम्पन्ती हृष्टा रविमनुनयत्येकपतिका ॥

भास्करी

अनुकूला पतिव्रता प्रकृतिः सरितो जलैः प्रफुल्लसरोजैः किसलयकरैः सुरभिदेवकुसुमैर्मन्दं सूर्यपदं समर्चति। कुसुमानां परागैर्लिम्पन्ती प्रसन्ना सूर्यमनुनयति ॥

भानुमती

पतिव्रता प्रकृति नदी के जल से विकसित कमलों द्वारा तथा देवपुष्पों द्वारा अपने किसलय-कोमल हाथों से सूर्य के चरण की पूजा धीरे-धीरे करती है तथा सुरभि फूलों के पराग का लेपन करती हुई सूर्य पति का अनुनय करती है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४४)

तरङ्गैस्तुङ्गैर्विहितनति रत्नाकरकुलं
नवैर्मुक्ताहारै रचयतुतरां स्वस्तिकमलम् ।
धरां लिम्पेन्नीलैः सुरभियुवतिर्गोमयरसै-
रयं देवो भास्वानवनिवदनं भूषयति भोः ॥

भास्करी

रत्नाकरकुलं लहरिभिः प्रणामं विदधत् मुक्ताफलैः स्वस्तिकमारचयतु, सुरभिर्गोमयरसैर्धरां लिम्पेत्; यतो हि भास्वान् अवनिवदनं भूषयति ॥

भानुमती

समुद्र अपने तरङ्गस्वरूप हाथों से प्रणाम करता हुआ रत्नों से स्वस्तिक बनावे तथा सुरभि गाय पृथ्वी का लेपन करे; क्योंकि भगवान् सूर्य इस समय पृथ्वी को स्वयं सजाने में लगे हुए हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४५)

शनैश्शीता वाता मलयगिरिसञ्चारकुशला
वहन्तु स्वच्छन्दे मधुरमधुचम्पानुगमनाः ।
प्रमुग्धामाश्वास्यामसहविरहक्लान्तवदनां
प्रियां प्राचीं भानुर्मृदु मृदु मुदा चुम्बति पुनः ॥

भास्करी

मलयपर्वतभ्रमणशीलाः, अनुनीतचम्पाः शीताश्च वाता मन्दं-मन्दं वहन्तु, यतोऽसह्यविरहवेदनाक्लान्तमुखीमतः प्रमुग्धां प्रियां प्राचीं प्रभाते सूर्यः शनैः शनैश्चुम्बति ॥

भानुमती

मलय पर्वत तथा चम्पा के सौरभ से युक्त शीतल हवा धीरे-धीरे वहे। अर्थात् शीतल मन्द सुगन्ध वायु चले, क्योंकि सूर्य विरह-वेदना से क्लान्त मुखवाली प्रमुग्ध अपनी प्राची प्रिया का प्रातःकाल चुम्बन करके आश्वस्त कर रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४६)

प्रभूतं सन्तापं विधिनियतपाकं तनुभृतां
वहन्तीं स्वच्छन्दं निरसितुमलं देवसरितम् ।
समासाद्य ब्राह्मे द्विजनिवह आराध्यचरितः
समाधाय स्वान्तं भजति सुरवन्द्येन मधुना ॥

भास्करी

प्रभाते तनुभृतां नियतपरिपाकं प्रभूतं सन्तापं निरसितुं स्वच्छन्दं वहन्त्या भागीरथ्यास्तीरे पूतचरितो द्विजसमूहो देववन्द्यं सूर्यं समाधाय भजति ॥

भानुमती

प्रातः जीवों के सन्ताप को दूर करने वाली अपनी गति से वहती हुई गङ्गा के किनारे एकाग्रचित्त पवित्र द्विजातीय, देवों से भी वन्द्य सूर्य की आराधना कर रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४७)

सुरस्त्रीणां वेणीसुरभिकुसुमव्रातमहिता
मुदा मज्जन्तीनां स्तनमृगमदव्याप्ततनवः ।
तरङ्गा नृत्यन्तः सकलसरितां पूतपुलिना
विभोर्भानोः पाद्यं विमलमतिभव्याय भवतु ॥

भास्करी

जले स्नान्तीनां देवाङ्गनानां केशपाशेभ्यश्च्युतानां कुसुमानां चयैर्व्याप्ताः वक्षोजकस्तूरीक्षोदैः सुरभयः पवित्रतीरा नृत्यन्तः सरितां तरङ्गाः, भानवे प्रदत्तं पाद्यं निर्मलान्तःकरणानां कल्याणाय सम्पद्यताम् ॥

भानुमती

जल में स्नान करते समय देवाङ्गनाओं की वेणी से गिरे हुए पुष्पों, स्तन में लिप्त कस्तूरी से सुरभि, तटों को पवित्र करने वाले उत्ताल नदियों के तरङ्ग एवं भक्तों द्वारा सूर्य के लिये प्रदत्त अर्घ्य सज्जनों के कल्याण के लिए हों ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४८)

क्वणन्तो घण्टौघाः सुरसदनभूभागमभितः
स्तुवन्तश्श्रूयन्ते श्रुतिनिपुणभूदेवनिवहाः ।
भ्रमन्तः शोभन्ते ध्वजवसनभागा दिशि दिशि
यदा देवो भास्वानभिलषति भूलोकमयितुम् ॥

भास्करी

यदा सूर्यं उदेति तदा मन्दिराणां घण्टाः कूजन्ति, वैदिका वेदपाठं कुर्वन्ति, मन्दिराणां ध्वजवसनानि दिशि-दिशि धूयन्ते ॥

भानुमती

सूर्योदय काल में मन्दिरों में घण्टे बजने लगते हैं, वैदिक लोग वेदपाठ करने लगते है और मन्दिरों की पताकाएँ चारों तरफ फहराने लगती है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(४९)

प्रतीचीमप्याशां नियमपरिभूतो दिनमणि-
दिनं भ्रान्त्वा सायं कतिपयकलाः संरमयते।
स एवायं प्रातः सकलसुरसेव्यः समभवद्
विधानं व्याहन्तुं विधिविलसितं कः प्रभवति॥

भास्करी

नियमनियतः सूर्यः प्रतीचीम् (प्रतिकूलाम्) अपि दिशं दिवसं भ्रमणं कृत्वा सायं कांश्चित् क्षणान् उपतिष्ठते। किन्तु स एव भास्वान् प्रातः देववृन्दैरपि पूज्यो भवति। विधेर्विधानं व्याहन्तुं ब्रह्मापि न प्रभवति। अत एवोच्यते 'समय एव करोति बलाबलम्'॥

भानुमती

दिनभर भ्रमण करने से परिश्रान्त, सूर्य नियम के वशीभूत होकर सायंकाल प्रतीची (विपरीत) दिशा को भी सन्तुष्ट करते हैं। वही सूर्य पुनः प्रातःकाल देवों के भी पूज्य हो जाते हैं। विधाता के नियम का पालन सबकों करना ही पड़ता है। इसीलिए कहा जाता है कि समय बड़ा बलवान् होता है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५०)

समाश्वास्य प्राचीं विलसदलिपुञ्जं सरसिजं
बलिं प्रातः प्रह्वश्रमणगणदत्तं सफलयन् ।
विहङ्गानां नादैरमरतटिनीतीरवसतां
समेति द्यां भास्वानमरजयशब्दैश्श्रुतिसुखैः ॥

भास्करी

पूर्वां दिशं समाश्वास्य मधुकरकुलगुञ्जितं कमलं महात्मभिः प्रदत्तं बलिमादरात् गृह्णन् भास्करो गङ्गापुलिने वसतां पक्षिणां नादैः श्रुतिसुखैरमराणां जय-जयशब्दैर्द्यामधिरोहति ॥

भानुमती

पूर्व दिशा को आश्वस्त कर महात्माओं से प्रदत्त अर्घ्य के रूप में सुरभिकमल को स्वीकार करते हुए सूर्य पक्षियों के शब्द के रूप में देवों के जय-जयकार के साथ आकाश की ओर अग्रसर हो रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५१)

निशां यावद् घोरैस्तिमिरतुहिनैर्युध्यत इनो
दिनं यावल्लोकं प्रियकरशतैः पालयति च।
दिवा नक्तं भ्राम्यन् क्षणमपि न शान्तिं हि लभते
सतां प्रादुर्भूतिर्भवति भुवनस्योपकृतये॥

भास्करी

सकलां रात्रिं भयङ्करैस्तिमिरैस्तुहिनैश्च सूर्यो युध्यते। सकलं दिनञ्च निजकरैर्लोकं पालयति। इत्थं दिवा नक्तञ्च क्षणमपि शान्तिं न लभते। यतो हि सतां जन्म लोकस्योपकारायैव भवति॥

भानुमती

भगवान् सूर्य रात्रिभर अन्धकार और शीत से लड़ाई करते हैं, और दिन भर लोक के पालन में व्यस्त रहते हैं। इस प्रकार सूर्य को दिन और रात एक क्षण भी विश्राम नहीं मिलता। सज्जनों का जन्म ही लोककल्याण के लिए होता है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५२)

जनानां साधूनां नयनसुखसौधद्रवचय:
प्रदीपो लोकानां मुनिहृदयकोशाब्जनिलयः ।
स एवायं बिम्बो दनुजबलशल्यः समभवन्-
महत्त्वं दुर्ज्ञेयं भवति महतां भौतिकधिया ।।

भास्करी

अयं भास्करबिम्बः साधूनां नयनसुखाय सुधाद्रवः, लोकानां प्रदीपः, मुनीनां हृदयकोशाब्जस्याद्वितीयं स्थानम् । परं स एव बिम्बः रक्षसां शल्योऽभवत्; यतो हि महतामैश्वर्यं लौकिकदृशा द्रष्टुं न पार्यते ।।

भानुमती

सूर्य का बिम्ब साधुओं के नयनों को आनन्द देने वाला अमृत रस है, लोक का प्रकाशक है और मुनियों के हृदयकमल का अद्वितीय स्थान है। किन्तु वही बिम्ब राक्षसों के हृदय में शल्य सा चुभता है। बड़े लोगों का ऐश्वर्य सामान्य जनों द्वारा नहीं देखा जा सकता ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५३)

पुरः पङ्गुं कृत्वा करुणहृदयश्चारुणमपि
समारोप्याश्वानां पृथुलमृदुपृष्ठं मुनिवरम्।
गुरोश्शापात् क्लान्तं निगमयति वेदं प्रतिपलं
महात्मा नायासं जगदुपकृतौ हन्त मनुते॥

भास्करी

कामं दयालुः सूर्यः गुरोः शापात् क्लान्तं याज्ञवल्क्यरूपं पंगुमप्यरुणं पुरः कृत्वा अश्वानां पृष्ठमारोप्य वेदमध्यापयति। आश्चर्यमिदं यत् महान् जनो लोकोपकरणे मनागप्यायासं न मन्यते।

भानुमती

अत्यन्त दयालु सूर्यनारायण, गुरु के शाप से खिन्न याज्ञवल्क्य मुनि रूपी अरुण को पंगु होते हुए भी आगे घोड़ों की पीठ पर बैठाकर वेद पढ़ाते हैं। बड़े लोग संसार के उपकार में थोड़ा भी परिश्रम नहीं मानते॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५४)

प्रतापैर्दीप्ताशो विषलितनभोदृप्तहृदयः
क्रुधाऽऽक्राम्यन् पादैर्हसितपृथिवीं मध्यमभुवम् ।
करैः कार्यं कर्तुं कृषकगणमुद्बोधयति च
यथाकर्मापीशो वितरति फलं नाग्रहवशात् ॥

भास्करी

तेजोभिर्दिशः प्रकाशयन्, नभोदृप्तहृदयं विदलयन्, धराया उपहासं कुर्वन्तीं मध्यभुवं क्रोधेनाक्राम्यन् सूर्यः स्वीयं कार्यं सम्पादयितुं कृषकान् करैः उद्बोधयति । सर्वशक्तिसम्पन्नोऽपि देवः कर्माण्यनुसृत्यैव फलं वितरति, नाभिनिवेशात् ॥

भानुमती

भगवान् सूर्य अपने तेज से दिशाओं को प्रदीप्त करते हुए आकाश के मत्त हृदय को विदीर्ण कर पृथ्वी का उपहास करने वाली आकाशधारा को आक्रान्त करते हुए कृषकों को अपने-अपने कार्य में तत्पर करते हैं; क्योंकि अत्यन्त समर्थ होते हुए भी देवता कर्म के अनुसार ही फल देते हैं, पक्षपात से नहीं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५५)

उषा रक्ता रागैः प्रियतमसमाश्लेषकुशला
शनैश्शय्यां मुक्त्वा तिमिरवसनालिं दवयते ।
प्रियालापैः शापैर्विविधविधभावं नटयते
प्रभाते सम्प्राप्तं दयितमतिमात्रं रमयते ॥

भास्करी

अनुरक्ता प्रियतमभास्करालिङ्गनचतुरा उषा शनैःशनैस्तल्पमुञ्झन्ती तिमिरवसनमपि दूरीकरोति। शपथपूर्वकं प्रियालापैर्विविधसात्त्विकभावं प्रदर्शयति। प्रभाते आयान्तं प्रियं सूर्यं विशेषतो रमयते ॥

भानुमती

प्रियतम के आलिंगन में कुशल अनुरक्त उषा धीरे से शय्या को छोड़ती हुई अनेक प्रकार के शपथपूर्वक आलापों से अपने सात्त्विक भावों को व्यक्त कर रही है। इस प्रकार प्रातः काल आये पति को रमा रही है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५६)

प्रभाभिः पन्थानं त्रिदशपवपूतं परिमृषन्
प्रमत्तान् क्रान्ताशान् प्रथितबलदर्पानभिभवन् ।
खगान् वृक्षव्रातान् हरिततृणपुञ्जं मलिनयन्
रविः सायं तेजो हरति सहसा भूतदयया ॥

भास्करी

आकाशमार्गं तेजोभिः संस्पृशन् अत्यन्तबलशालिनः प्रमत्तान् तिरस्कुर्वन् वृक्षान्, पक्षिणः, तृणपुञ्जान् च मलिनयन् रविः सायं जीवदयया स्वं तेजो हरति ।

भानुमती

आकाश में अपना तेज फैलाते हुए अत्यन्त बलशाली प्रमत्तों का अनादर करते हुए, वृक्षों पक्षियों और हरे भरे घासों को कुम्हलाते हुए भगवान् सूर्य सायंकाल जीवों पर दया कर अपना तेज समेट रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५७)

अघृष्यं यद् रूपं मुनिमहितपादस्य सवितु-
निरस्तध्वान्तारे रघुकुलगुरोर्लोकमवितुः ।
मनाङ्न्यूनं नाभूदुदधितलसम्पातसमये
सतां सिद्धं रूपं न च परिणतिं क्वापि भजते ॥

भास्करी

अन्धकारनाशकस्य देववन्द्यस्य लोकरक्षकस्य रघुकुलगुरोः सूर्यस्य यत् प्रगल्भं तेज उदयकाले आसीत्, अस्ताचलं प्रयातस्य तस्य तेजसि मनागपि न्यूनता न जाता । सतामेकमेव सिद्धं रूपं भवति, तत्र क्वचनापि न्यूनता न दृश्यते ॥

भानुमती

लोकरक्षक, सुरासुरवन्दित, रघुकुलगुरु सूर्य का प्रखर तेज अन्धकार दूर करने के समय थोड़ा भी कम नहीं हुआ । बड़े लोगों का एक रूप सिद्ध है, जिसमें कभी भी परिवर्तन नहीं होता ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५८)

प्रबालानां पुञ्जः किसलयदलानां रसचयः
सुवृत्तं सिन्दूरं प्रकृतिरमणीभालतिलकम् ।
अघानामङ्गारो विपिनबटुतेजोऽभिजनितः
प्रभोर्बिम्बं भानोरुदयगिरिभाले विजयते ॥

भास्करी

(सूर्यबिम्बमुत्प्रेक्ष्यते यत्) किमयं प्रबालानां पुञ्जः ? उत किसलय-दलानां रसराशिः ? आहोस्वित् प्रकृतेर्वनिताया भालस्य तिलकम् ? अथवा आरण्यकब्रह्मचारिणां तेजोभिर्जनितोऽघानां नाशकोऽङ्गारः ? यत्सुमेरोर्भाले विजयते ॥

भानुमती

(सूर्य के बिम्ब की उत्प्रेक्षा जा रही है कि) क्या यह बिम्ब प्रबालों का पुञ्ज है ? या किसलयों का रससमूह ? अथवा प्रकृति नायिका के भाल का गोलाकार तिलक है ? या अरण्य में रहने वाले ब्रह्मचारियों की तपस्या से उद्भूत, पापों को जलाने वाला अङ्गार है जो इस समय उदयगिरि के भाल पर चमक रहा है ? ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५९)

विकासप्राप्ताब्जारुणमृदुलहस्ता गिरिकुचा
भ्रमद्धंसश्रेणी धवलवसना भृङ्गनयना।
लतावेणी रम्भापृथुलजघना पुष्पवदना
प्रभा रामा रागैरनुसरति भानुं स्वदयितम् ॥

भास्करी

विकासमाप्तानि कमलान्येव यस्या अरुणा मृदुलाश्च हस्ताः, गिरय एव स्तनाः, नद्यास्तटे मन्दं मन्दं व्रजन्तीनां हंसीनां श्रेणिरेव धवलं वसनम्, कमलोपरि गुञ्जन्तो मधुकराश्च नयनम्, लता एव केशपाशः, रम्भा एव विशालं जघनम्, पुष्पाण्येव मनोहरं मुखम्, एवम्भूता सा प्रभा रामा सात्त्विकभावैः स्वप्रियं सूर्यमुपतिष्ठते ॥

भानुमती

विकसित कमल ही जिसके लाल एवं मनोहर हाथ हैं, पर्वत ही स्तन हैं, नदियों के किनारे विचरती हुई हंस-पक्तियाँ उज्जवल वस्त्र हैं, लताएँ केशपाश है, केले के स्तम्भ ही विशाल जघन हैं, मधुकर ही नेत्र हैं, पुष्प ही मुख है, ऐसी सजी हुई प्रभा रामा अपने प्रियपति भास्कर से अनुरागपूर्वक मिल रही है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६०)

निपीतैनःपुञ्जे यजनशरणस्थापिततनौ
विभाध्वस्तध्वान्ते शुचिहुतवहे हव्यकवलम् ।
द्विजैर्दत्तं सम्यग् भुवनतलसेकाय सुरभिं
कराः संकर्षन्तो द्युतिमनुपमां यान्ति सवितुः ॥

भास्करी

पापघ्ने विभाभिर्ध्वस्तध्वान्ते यज्ञशालायां स्थापिते पवित्रवह्नौ ऋषिभिर्हुतं सुरभि हव्यं भुवनकल्याणाय गृह्णन्तः सूर्यस्य करा असदृशीं शोभां प्राप्नुवन्ति ॥

भानुमती

पापनाशक प्रभा से अन्धकार को दूर करने वाले यज्ञशाला में स्थापित अग्नि में ऋषियों द्वारा दिए गए सुरभि हव्य को जनकल्याण के लिये ग्रहण करने वाले सूर्य की किरणें अनुपम शोभा प्राप्त कर रही हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६१)

गिरौ नद्यास्तोये विपिनपथभागे च जलजे
दरीतुं दैन्यानि त्रिभुवनजनानां प्रतिदिनम् ।
प्रदीप्तार्चिर्माला विततभुवनाभोगपरिधौ
प्रकीर्णाः सौवर्णा दिनमणिकरा भान्ति सततम् ॥

भास्करी

सर्वेषां जनानां दैन्यानि प्रतिदिनं नाशयितुं पर्वते, सरितो जले, अरण्ये, कमले, किम्बहुना, सम्पूर्णे भुवने विस्तृताः प्रदीप्ताः सुवर्णवर्णाः सूर्यकिरणाः सततं भान्ति ॥

भानुमती

समग्र जीवों के दैन्य को दूर करने वाली पर्वत, जल, जङ्गल, कमल आदि सम्पूर्ण भुवन में फैली हुई सूर्य की सुनहरी किरणें प्रतिदिन देदीप्यमान रहती हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६२)

विभो भानो तावन्निखिलभुवनध्वान्तविरतिं
विधत्से किं चित्रं सकलभुवनस्यादिजनितुः ।
परन्त्वेतच्चित्रं यदिह मम दीनस्य हृदये
तमश्शिष्टं क्लिष्टं प्रखरकिरणैर्नो विगलितम् ॥

भास्करी

हे सूर्य, त्वं सकललोकस्य तमो यन्नाशयसि तन्निखिलस्य भुवनस्य मूलकर्तुंस्तव कृते किमाश्चर्यम् ? किन्त्विदं महदाश्चर्यं यत् शतकलेखकस्य दैन्यग्रस्तस्य मम मनसि वर्तमानं क्लेशकरं तमस्तव प्रखरकिरणैरद्यापि न नाशं प्रापत् ॥

भानुमती

हे भानु, तुम सम्पूर्ण जगत के अन्धकार को नष्ट कर देते हो इसमें कोई आश्चर्य नहीं है; क्योंकि तुम सकल भुवन के आदि कर्त्ता हो। किन्तु अत्यन्त आश्चर्य की बात यह है कि मेरे मन का अन्धकार आपकी प्रखर किरणों से आज भी नष्ट नहीं किया जा सका ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६३)

घनीभूतं नैशं निखिलजगतोऽपुण्यनिचयं
तमो दूरीकर्त्तुं यदि तरणिरश्मिर्विजयते ।
कथं मूढा मर्त्याः सुलभदलने रोगतिमिरे
निपीडयन्तेऽनीशाः सदयरविसेवाविरहिताः ॥

भास्करी

निखिलस्य जगतः पापनिचयं निशि घनीभूतं तमो यदि सूर्यकिरणाः हन्तुं समर्थाः, तर्हि सदयस्य रवेः सेवाविरहिता अत एव मूढा जनाः सुलभदलने रोगतिमिरेऽसमर्थाः सन्तः कथं पीडयन्ते ! ॥

भानुमती

यदि सूर्य समग्र संसार के निविड पापान्धकार को नाश करने में समर्थ है तो ऐसे दयालु देव की उपासना छोड़कर मनुष्य, जिसका नाश सुलभ है ऐसे रोग से असहाय होकर क्यों पीड़ित होते हैं ! ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६४)

तरीतुं निर्बाधं जगदुदधिसद्बाधसरणिं
सुराणां सर्वेषां समुदितमहोराशिरभितः ।
विधातुर्वैदुष्यात् सफलकलया निर्मिततनु-
र्घटोऽयं सौवर्णो गगनतलभाले विजयते ॥

भास्करी

संसारसमुद्रस्य संकटापन्नां लहरिं तरीतुं सकलानां सुराणां तेजोराशिमादाय नैपुण्येन सकलकलया विधात्रा निर्मितोऽयं सुवर्णघटो नभसि विराजते । अन्यत्रापि सरिदादिपाराय घटो गृह्यते जनैः । (अत्र बिम्बः सुवर्णघटत्वेनोत्प्रेक्ष्यते) ॥

भानुमती

संसार-समुद्र को पार करने के लिए सभी देवों के तेज को एकत्र कर विधाता द्वारा अपनी कला से बनाया हुआ यह बिम्ब मानो सुवर्ण का घड़ा है । लोक में भी नदी आदि को पार करने के लिए घट का सहारा लिया जाता है । (यहाँ पर बिम्ब की उत्प्रेक्षा सुवर्णघट के रूप में हुई है) ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६५)

विधिर्यज्ञाचार्यो विविधविधिनेता सुरगुरुः
सुरव्रातो होता यजनवसुधा स्वर्णशिखरो ।
सुधाधारा हव्यं त्रिभुवनतपोराशिरनलः
फलं बिम्बं भानोरुदयमयते मङ्गलकृते ॥

भास्करो

विधाता यज्ञाचार्यः, बृहस्पतिर्विधिप्रदर्शकः, देवा होतारः, यज्ञभूमिः सुमेरुः, सुधा हव्यम्, त्रैलोक्यस्य तपोराशिरनलः—एवंविधस्य यज्ञस्य फलं भानोर्बिम्बं लोककल्याणार्थं समुदयते ॥

भानुमती

इस प्रकार का यज्ञ जिसमें साक्षात् ब्रह्मा ही यज्ञाचार्य, बृहस्पति ही विधि-निर्देशक, देवगण ही होता, सुधा ही हव्य तथा त्रिभुवन का तप ही अनल था, लोकसन्ताप दूर करने के लिये सुमेरु पर्वत पर हुआ जिसका फल यह सूर्य का बिम्ब हुआ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६६)

करे ते केयूरं शिरसि मुकुटं रत्नखचितं
गले भानो दिव्यं नयनसुखमुक्तामणिसरम् ।
कटौ कौशेयान्तं कनकरसरागेण कलितं
निशान्ते बिम्बान्तः क्षपितकलुषो ध्यायति मुनिः ॥

भास्करी

हे भगवन्, तव हस्ते केयूरम्, शिरसि रत्नखचितमुकुटम्, गले नयनयोः सुखदां मुक्तामणिमालाम्, कटौ सुवर्णरागं मनोहरं कौशेयम् वीतरागो मुनिरेव प्रातः पश्यति ॥

भानुमती

हे सूर्य, तुम्हारे हाथ में केयूर, मस्तक पर रत्नजटित मुकुट, गले में दिव्य मोती की माला और कमर में मनोहर पीताम्बर है, जिसका दर्शन प्रातःकाल वीतराग मुनि लोग ही करते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६७)

क्षापैर्घातोः क्षोदैर्विबुधगिरिभूमिं तिलकयन्
प्रचण्डह्लेषाभिर्भुवनकुहरं संविघटयन् ।
रुषा चञ्चत्प्रोथैर्विततततिमिरौघं कवलयन्
हसन् वात्यावेगं जयति सवितुर्वाजिसमजः ॥

भास्करी

खुरैरुत्थापितैर्गैरिकादिधातोश्चूर्णैः सुमेरोर्भाले तिलकं कुर्वन् अश्वानां प्रचण्डाभिर्ह्लेषाभिर्भुवनानां कर्णकुहरं विदारयन् चपलप्रोथैस्तमस्ततिं कवलयन्, वात्यावेगं च हसन् सूर्यस्याश्वनिवहो विजयते ॥

भानुमती

खुरों के द्वारा उडायी गयी गैरिकादि धातुओं के चूर्ण से सुमेरु को तिलक लगाते हुए घोड़ों की प्रचण्ड हिनहिनाहट से भुवन के कानों को फाड़ते हुए, चंचल थूथुनों से अन्धकार को चबाते हुए, अपने वेग से झंझावात का उपहास करते हुए सूर्य के घोड़े प्रातः काल विजयी हो रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६८)

त्वमात्मा त्वं चक्षुर्निखिलभुवनस्यापि जनकः
परा वाणी योगक्षपितकलुषैर्युक्तधिषणैः ।
परब्रह्माद्वैतप्रवचनपटिष्ठैः सुकृतिभिः
स्फुटत्यर्थो यस्मात् तदिति विदितं शब्दनिपुणैः ॥

भास्करी

हे सूर्य, त्वं जगत आत्मा तथा चक्षुः, भुवनस्य जनकोऽसि । त्वं योगेन क्षपितपापैर्युक्तैर्योगिभिः परारूपवाणित्वेन, अद्वैतवेदान्तिभिः परब्रह्मत्वेन, शाब्दिकैश्च स्फोटत्वेन स्वीक्रियसे ॥

भानुमती

हे सूर्य, तुम संसार को आत्मा तथा नेत्र हो और लोक के जनक हो । योगियों के द्वारा परा वाणी के रूप में, वेदान्तियों के द्वारा परब्रह्म के रूप में तथा वैयाकरणों द्वारा स्फोट के रूप में स्वीकार किये जाते हो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(६९)

विभो सांख्यैर्योगैर्ल सदुपनिषत्तत्त्वरसिकै-
स्त्वमेवैको गम्यः प्रकृतिरिव तत्त्वान्तरगणैः।
पृथिव्याद्यं भूतं जनितमखिलं ते पदयुगात्
यथा धातोर्नाम प्रभवति समं शाब्दिककुले ॥

भास्करो

विभो, सांख्यैर्योगैर्वेदान्तैश्च तत्त्वान्तरैः प्रकृतिरिव एकस्त्वमेव गम्यः। यथा वैयाकरणानां मते "सर्वं नाम धातुजमाहेति शकटस्य च तोकम्" इति शाकटायनसिद्धान्तात् धातोरेव सर्वं प्रातिपदिकमुत्पद्यते, तथा ते पदयुगात् सर्वं पृथिव्यादिभूतं समुत्पद्यते ॥

भानुमती

जैसे प्रकृति अन्य सभी तत्वों का आधार है उसी तरह सूर्य भी सभी तत्वों के आधार हैं। जैसे वैयाकरणों के मत से सभी प्रातिपदिक धातु से बनते हैं वैसे ही पृथ्वी आदि सभी भूत सूर्य के चरण से उत्पन्न होते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७०)

श्रुतिघ्वानव्रातध्वनितहरिदाकाशविवरै-
हंविर्ज्वालाजालज्वलितदुरितैर्भव्यभवनैः ।
क्रियाशीलं यज्ञैर्यजनविधिनायाज्ञिककुलं
सहस्रांशुं नित्यं यजति ननु नारायणधिया ॥

भास्करी

क्रियाशीलं याज्ञिककुलं भव्यभवने दिगाकाशविवरे व्याप्तैर्वेदध्वनिभिः, हविषां ज्वालाजालैर्ज्वलितदुरितैर्यज्ञैर्नारायणबुद्धया भगवन्तं भास्करमेवोपास्ते ॥

भानुमती

क्रिया में निपुण याज्ञिककुल शास्त्रविधि द्वारा निर्मित यज्ञशाला में वेदध्वनि से, जलते हुए हव्य से दुरितों का नाश करते हुए यज्ञों द्वारा नारायणबुद्धि से भगवान् सूर्य की ही उपासना करता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७१)

विभो भूतं भव्यं भुवनमखिलं शास्त्रविदितं
सदानन्दाद् बोधात् पदसरसिजात् ते विलसति।
हरेश्चक्रं धारादलितदनुजादभ्रदरकं
व्यधाद् धाता नूनं किरणकणमाकृष्य कमपि॥

भास्करी

हे विभो, शास्त्रात् ज्ञातमतीतमनागतं च निखिलमपि भुवनं सच्चिदानन्दरूपात् ते पदकमलात् विलसति। विधाता धारया दनुजजन्यभयविदारकं विष्णोश्चक्रमपि ते किरणकणैर्व्यधात्॥

भानुमती

हे सूर्य, अतीत तथा अनागत सभी भुवन सच्चिदानन्दस्वरूप तुम्हारे चरणकमल से उत्पन्न है। भगवान् विष्णु का वह चक्र भी, जिसकी धार से वे सम्पूर्ण राक्षसों द्वारा उत्पन्न भय को दूर करते हैं, तुम्हारी कुछ किरणों से ही विधाता द्वारा बनाया है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७२)

अहो भानोर्ह्रेषा हरिततुरगाणामनुदिनं
प्रतिध्वानैस्तीव्रैर्मुखरितमहीध्रोदरदरी ।
दिशां सन्त्रस्तानां मदकलघटानां श्रुतिबिले
प्रसूते सन्तापं हरति परितापं सुमनसाम् ॥

भास्करी

अहो ! भानोरश्वानां प्रतिदिनं ह्रेषा श्रूयते, यस्यास्तीव्रः प्रतिध्वनिः पर्वतानामुदरदरीं व्याप्नोति, त्रस्तानां दिग्गजानां कर्णकुहरे सन्तापं जनयति सतां परितापं च हरति ॥

भानुमती

आश्चर्य है कि भगवान् भास्कर के घोड़ों की हिनहिनाहट की भयङ्कर प्रतिध्वनि पर्वतों की कन्दराओं को व्याप्त करती है, भयभीत दिग्गजों के कानों में ज्वर पैदा करती है तथा सज्जनों के सन्ताप को दूर करती है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७३)

समूहं पापानामवनिवसतीनां विघटयन्
विलीनं वार्धौ च झटिति वडवावह्निवशयन् ।
सतां हृद्यो भास्वान् कुलिशकरकाष्ठां विशदयन्
सुरीभिः संगीतः सुरपतिनुतः खे विजयते ॥

भास्करी

जनानामघनिकरं विघटयन्, उदधौ विलीनं च झटिति वडवानले प्रक्षिपन्, सद्भिरादरणीयः देवाङ्गनाभिर्गीयमानः शक्रेण प्रणम्यमानो भास्करः पूर्वां दिशं प्रकाशयन् आकाशे विजयते ॥

भानुमती

जीवों के पाप को नष्ट करते हुए, समुद्र में छिपे हुए पापों को वड़वानल के मुख में झोंकते हुए, देवाङ्गनाओं के गीत सुनते हुए इन्द्र से प्रणत भगवान् सूर्य पूर्व दिशा को प्रकाशित करते हुए आकाश में सुशोभित हो रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७४)

महापङ्के मग्नान् विपदि पतितानङ्गविकलान्
तपश्शून्यानज्ञान् विभवरहितान् पुण्यविधुरान्।
जनान् पातुं भानो त्वमिव दयया त्वं विजयसे
नतोऽस्तोऽहं पादं शरणमभियाचे तव विभो॥

भास्करी

अन्धकारे पतितान्, दुर्दशाग्रस्तान्, अङ्गविकलान्, सम्पत्तिरहितान्, तपोविमुखान्, पुण्यविधुरान् जनान् दयया पातुं त्वमेव वर्तसे। अतोऽहमपि तव पादं शरणं याचे॥

भानुमती

घोर अन्धकार में पड़े हुए विपन्न, अङ्गविकल, निर्धन, तपोहीन पापी को दया से रक्षण करने में तुम्हीं समर्थ हो। अतः मैं भी तुम्हारी शरण की याचना करता हूँ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७५)

विजेता रामोऽपि त्रिभुवनजितो राक्षसपतेः
सवा पूर्णं पात्रं द्रुपदतनयाऽऽशावितवतो ।
प्रसादाच्छ्रद्धातः सततकृतभक्तेर्दिनमणे-
र्महाशक्तेर्भक्तिर्न हि भवति मोघा क्वचिदपि ॥

भास्करी

श्रद्धात आराधितस्य सूर्यस्य प्रसादात् त्रिभुवनविजेतुः रावणस्यापि विजेता रामोऽभूत्, द्रौपद्यपि अक्षय्यं पूर्णपात्रमासादितवती । महाशक्तेर्भक्तिः कदापि निष्फला न भवति ॥

भानुमती

भक्तिपूर्वक सूर्य की आराधना से श्रीरामचन्द्र ने त्रिभुवनविजेता रावण पर विजय प्राप्त की । उन्हीं की आराधना से द्रौपदी को भी अक्षय पात्र प्राप्त हुआ । ठीक ही है, क्योंकि शक्तिसम्पन्नों की आराधना कभी भी विफल नहीं होती ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७६)

न याचे साम्राज्यं विपुलविभुतं शत्रुरहितं
प्रतिष्ठां वा लोके सुरपतिपदं देवमहितम् ।
यशो विद्यां वाणीं नृपतिसदसि स्थानमथवा
परं याचे भानो तव चरणचर्चामनुदिनम् ॥

भास्करी

ऐश्वर्यसम्पन्नं शत्रुरहितं राज्यं न कामये, देवप्रार्थितमैन्द्रपदमपि न कामये, लोके प्रतिष्ठां यशो विद्यां वाणीं राजसभायां श्रेष्ठं स्थानमपि न कामये; किन्तु हे सूर्य, प्रतिदिनं तव चरणचर्चामवश्यं कामये ॥

भानुमती

हे भगवन्, मुझे अत्यन्त समृद्ध शत्रुरहित राज्य, ऐन्द्रपद, लोक में यश, प्रतिष्ठा, विद्या, वाणी, राजसभा में उच्च स्थान आदि की कोई कामना नहीं है। किन्तु प्रतिदिन आपके चरण का गुणानुवाद करता रहूँ यही मेरी एक कामना है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७७)

परं देवं स्वर्णाम्बुजकपिशमूर्त्तिं भवहरं
प्रभाते नावीन्यं प्रतिदिनमुपेतं शिवकरम् ।
तपन्तं तेजोभिर्हरिततुरगस्यन्दनसखं
शरण्यं स्तौमीनं प्रणतशिरसा श्रौतवचसा ॥

भास्करी

कनककमलसदृशशरीरं भवहरं प्रतिदिनं कल्याणकरं तेजोभिर्दीप्तं स्यन्दनारूढं श्रेष्ठं देवं भगवन्तं भानुमन्तं रक्षकं नम्रशिरसा वेदवचसा प्रणमामि ॥

भानुमती

सुवर्ण कमल के समान देदीप्यमान, संसार से मुक्ति देने वाले प्रतिदिन नवीनता लिये हुये अत्यन्त तेजस्वी रथ पर बैठे हुये रक्षक सूर्य की मैं नतमस्तक होकर वेदों से स्तुति करता हूँ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७८)

वहद् वाष्पं पाद्यं हृदयकमलं पीठममलं
सनालं कञ्जं ते चरणयुगले पाणियुगलम् ।
परा भक्तिस्त्यक्तेतरसुरगणा चन्दनरसो
मदीयं दैन्यं भो भवतु तरणे निष्कमतुलम् ॥

भास्करी

हे तरणे ! तव चरणस्यार्चायां मम दीनस्य वहद् वाष्पं पाद्यम्, हृदयकमलममलं पीठम्, पाणियुगलं सनालं कञ्जम्, त्वय्येवासाधारणभक्तिश्चन्दनरसः, अनितरसाधारणदैन्यं दक्षिणा भवतु ॥

भानुमती

हे सूर्य, अत्यन्त दीन मेरे आंसू पाद्य के रूप में मेरा हृदयकमल तुम्हारे बैठने के स्थान के रूप में, मेरे दोनों हाथ तुम्हारे चरण में कमल के रूप में, अन्य देवों को छोड़कर आप में ही मेरी भक्ति चन्दन रस के रूप में और मेरी अनुपम दीनता दक्षिणा के रूप में हो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७९)

यतस्तेजोराशेः कतिपयकणैर्विष्णुरखिलं
जगद् रक्षन् स्वैरं सकलसुरसेव्यश्च भवति ।
महेशो माहात्म्यात् धरति निजकेशे सुरधुनीं
विभो ते तत्तेजः प्रबलमशिवं मे शमयताम् ॥

भास्करी

यस्य भगवतः सूर्यस्य तेजोराशेः कतिपयैरेव कणैर्विष्णुरखिलं जगद् रक्षन् सर्वपूज्योऽभवत्, महेशेन ततः प्राप्तेन माहात्म्येन निजकेशे गङ्गापि धार्यते। हे प्रभो, तव तत्तेजो मे प्रबलमशिवं शमयतु ॥

भानुमती

हे सूर्य, तुम्हारे जिस तेज के कुछ कणों से भगवान् विष्णु सम्पूर्ण जगत् की रक्षा करते हैं तथा सर्वपूज्य कहलाते हैं और शङ्करको भी उसी माहात्म्य से गङ्गा को अपनी जटा में धारण करने की शक्ति प्राप्त हुई, वही तुम्हारा प्रबल तेज मेरे सम्पूर्ण अशिव को दूर करे ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८०)

त्वदंशोद्भूतां यो भजति यमुनां भक्तिवलितो
महाक्षुद्रस्यापि प्रभवति यमो न क्वचिदपि।
जनो भानोः पादं श्रयति यदि भक्त्या प्रतिदिनं
फलानां संख्याने विधिरपि न तस्य प्रभवति॥

भास्करो

येन जनेन त्वदंशजा यमुना भक्त्या सेव्यते, महापातकिनोऽपि तस्य यमयातना न भवति। यदि स एव जनः प्रतिदिनं तव पादं सेवेत, तदा तस्य फलस्य गणनां बृहस्पतिरपि न कुर्यात्, किमुत अन्ये जनाः॥

भानुमती

तुम्हारे अंश से उत्पन्न यमुना की सेवा जो लोग भक्तिपूर्वक करते हैं, उन्हें यम-यातना कभी नहीं होती। भगवन्, यदि तुम्हारे ही चरण की सेवा की जाय तो उसके फल की गणना बृहस्पति भी नहीं कर सकते॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८१)

अहो चित्रं भानो त्वयि समुदिते ते शिखरिणः
समन्तादापीड करनिकरपद्मैर्विरचितम् ।
दधाना राजन्तेऽनुपमसुषमाश्च प्रतिदिनं
सतां भूतिर्नित्यं भवति जगतो मङ्गलमयी ॥

भास्करी

भगवन्, त्वयि समुदिते ते जडा अपि पर्वताः करनिकरपद्मविरचितं मुकुटं दधाना अलौकिकीं शोभां प्राप्नुवन्ति। सतां भूतिर्नित्यं जगतो मङ्गलमयी भवति ॥

भानुमती

हे सूर्य, तुम्हारे उदय होने पर अचेतन पर्वतादि भी तुम्हारे किरणसमूह रूप कमल से बनी हुई माला धारण करते हुए अलौकिक शोभा प्राप्त करते हैं। बड़े लोगों का ऐश्वर्य सर्वदा संसार का मङ्गल करने वाला होता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८२)

परं तत्त्वं भानो यमनियमयोगैर्मुनिजनै-
स्तपोभिः स्वाध्यायैर्विबुधपरिचर्यादिविधिभिः ।
न शक्यं सम्प्राप्तुं बहुविधवितानैश्च विहितै-
र्दया न स्याद् यावत् तव पदसरोजस्य भजनात् ॥

भास्करो

हे भगवन्, मुनयोऽपि यमैर्नियमैस्तपोभिर्वेदाध्ययनैः सुराणां सेवाभिरनेकैर्यज्ञैश्च तव तत्त्वं प्राप्तुं न शक्नुवन्ति, यदि भवतः पदसरोजस्य दया न स्यात् । 'यमेवैष वृणुते तेनैव लभ्यः' इति उपनिषद्वचनात् ॥

भानुमती

हे भगवन्, मुनि लोग भी यम, नियम, स्वाध्याय, वेदपाठ, देवों की सेवा तथा अनेक यज्ञों से भी तुमको यथायथ नहीं प्राप्त कर सकते, यदि आपके चरण की दया न हो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८३)

द्विजालीनां कान्त्या प्रतिदलितकुन्दावलिमदः
प्रभाभिः पादानामुपहसितपद्मद्युतियशाः ।
प्रभावैर्नेत्राणां मलिननलिनो भूतिकलितः
प्रसाध्नोति प्राचीं करकिसलयैर्भानुरभितः ॥

भास्करी

दन्तानां प्रभाभिः कुन्दानां मदं दूरीकुर्वन्, पादानां कान्त्या पद्मानां तेजोयश उपहसन्, चक्षुषां प्रभावैर्नलिनं मलिनयन् कान्तिसम्पन्नो भानुरभितः पूर्वां दिशं समलङ्करोति ॥

भानुमती

दाँतों की कान्ति से कुन्द पुष्प के सौन्दर्य-मद को दूर करते हुए, चरणों की प्रभा से कमल की कान्ति के यश को धूमिल करते हुए, आंखों के प्रभाव से नील कमल को मलिन करते हुए अत्यन्त देदीप्यमान सूर्य प्रातःकाल पूर्व दिशा की शोभा बढ़ा रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८४)

उलूकाः संख्याना ज्वलदनलपिण्डं दिनमणे-
विधीनां विद्वांसः परिणतफलं मण्डलमिदम् ।
सरोजिन्या भाग्यं परमरमणीया युवतयो
विधातुर्मन्यन्ते भरणकनकं तर्करसिकाः ॥

भास्करो

प्रातः सूर्यस्य बिम्बं भयेन संकुचिता उलूकाः कामं दीप्तं वह्निपिण्डं मन्यन्ते, विद्वांसः क्रियाणां परिपक्वं फलं मन्यन्ते, सुन्दर्यः सरोजिन्याः सौभाग्यसिन्दूरं मन्यन्ते, तार्किकाः ब्रह्मणो जगत्सृष्टेः पारिश्रमिकं सुवर्णं मन्यन्ते ॥

भानुमती

सूर्योदय से भयभीत उलूक पक्षी सूर्य-बिम्ब को जलते हुए अंगार का गोला मानते हैं, विद्वान् लोग क्रियाओं का पका हुआ फल (परिणाम) मानते हैं, युवतियाँ कमलिनी का सौभाग्यचिह्न मानती हैं और तार्किक लोग विधाता की सृष्टि रचने की मजदूरी सुवर्ण की गिन्नी मानते हैं ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८५)

प्रकृष्टैस्तेजोभिर्जगदखिलपापं विदलयन्
रविर्नित्यं प्राच्यामुदयमयते चान्धतमसम् ।
सुरानन्यान् हित्वा विहितरविपादाम्बुजकरः
सुखं शेते शुक्लो विगतभयपुञ्जः प्रतिदिनम् ॥

भास्करी

प्रखरतेजोभिर्निखिलस्य जगतः पापं तमश्च नाशयन् रविर्नित्यं प्राच्यामुदयमेति । अतोऽहमन्यान् देवान् विहाय, रवेः पादाम्बुजे करं निधाय निखिलपापभयान्मुक्तः सुखं शये ॥

भानुमती

सूर्य अपनी प्रखर किरणों से जगत् के सभी पापों को तथा अन्धकार को नाश करते हुए पूर्व दिशा में उदित होते हैं। अब मैं अन्य देवों की आशा छोड़कर हे सूर्य, तुम्हारे चरणकमलों पर हाथ रखकर सभी पापों से मुक्त होकर निर्भय सोता हूँ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८६)

करैः कञ्जश्रेणिं भ्रमरकुलगीतां च विदधन्
महामोहे मग्नं जगदखिलमुद्धर्तुमभियन् ।
पतन् वार्द्धौ सायं परहितसमाधाननियमो
दयालुर्मार्तण्डो भ्रमति भुवनाभोगसरणौ ॥

भास्करी

स्वकरैर्मधुकरकुलगीयमानां कमलपङ्क्तिं कुर्वन् महान्धकारे निमग्नं निखिलमपि जगदुद्धरन्, किम्बहुना, सायं पश्चिमोदधौ परकल्याणार्थमात्मानं निपातयन् सम्पूर्णभुवने दयालुर्मार्तण्डो भ्रमति ॥

भानुमती

भगवान् सूर्य प्रातः अपनी किरणों से कमलों को विकसित कर भ्रमरों से गुञ्जित करते हुए अत्यन्त अन्धकार में निमग्न संसार के उद्धार का अभियान करते हैं। यहाँ तक कि दूसरों के कल्याणार्थ अपने को भी पश्चिम समुद्र में डुबाते हुए सम्पूर्ण भुवन में घूमते रहते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८७)

विरञ्चिर्वार्द्धक्ये विगतभयराशिश्च रमतां
श्रिया रन्तुं श्रीशो झटिति परितोषं च जुषताम् ।
महादेवो भूतैर्धवलगिरिलास्यं वितनुतां
सवित्री कामानां जगति रविसेवा विजयताम् ॥

भास्करो

विधाता वार्द्धक्ये निखिलमपि भयं परित्यज्य सुखं रमताम्, श्रीशोऽपि श्रिया निर्भयं रमताम्, शङ्करः कैलासे भूतैः साकं ताण्डवनृत्यं वितनुताम्, सम्प्रति सर्वेषां कामानां दाता भगवान् सूर्यो जगति जागर्ति ॥

भानुमती

बुढ़ापे में ब्रह्मा वीतचिन्त होकर आनन्द करें, भगवान् विष्णु भी लक्ष्मी के साथ निर्भय होकर विहार करें, शंकर भी कैलास पर्वत पर भूत वैतालों के साथ ताण्डव नृत्य करें, क्योंकि सम्पूर्ण मनोरथों के दाता भगवान् सूर्य इस समय भुवन में जागरूक हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८८)

रथं दिव्यं सज्जीकुरु झटिति मार्तण्ड भगवन्
तुरङ्गान् विख्यातान् दृढतरयुगे सन्नियमय।
करैस्तिग्मैस्तावद् दृढपरिकरस्त्वं च परितो
महापापः शुक्लस्तव चरणयोरद्य पतितः॥

भास्करी

भगवन् सूर्य, शीघ्रं स्वं दिव्यं रथं सन्नाहय, प्रसिद्धानश्वान् दृढे युगे बधान, दृढपरिकरो भव, यतो हि महापापः शुक्लः सम्प्रति आत्मन उद्धारार्थं तव चरणयोः पतितः। (महापापस्योद्धाराय महान् सन्नाहोऽपेक्ष्यते)॥

भानुमती

दयालु सूर्य, अपने दिव्य रथ को सजा लो, प्रसिद्ध घोडों को दृढ़ जुआठ में बांध लो, सावधानी से कमर कस लो; क्योंकि इस समय बहुत बड़े पापी शुक्ल का तुम्हें उद्धार करना है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(८९)

त्वदंशाभ्यां ताभ्यां विशदनयनाभ्यामलमहो
न याभ्यामुत्काभ्यां तव चरणपद्मं विलसितम् ।
रवीत्येतन्नाम श्रवणमधुरं मानसमदं
न पीतं पीयूषं श्रुतिभिरपि ताभिर्नहि फलम् ॥

भास्करी

त्वदंशाज्जाताभ्यां निर्मलनयनाभ्यां किं फलम्, याभ्यां सोत्कण्ठाभ्यां तव पदकमलं न निरीक्षितम्! ताभ्यां कर्णाभ्यामपि किं फलम्, याभ्यां श्रुति-मधुरं मनस आह्लादकरममृतं रवीत्येतदभिधानं सादरं न पीतम् ॥

भानुमती

हे भास्कर, तुम्हारे ही अंश से उद्भूत निर्मल नेत्रों से क्या लाभ, जिन्होंने उत्सुक होकर तुम्हारे चरणों का दर्शन नहीं किया; और उन कानों से भी क्या लाभ, जिन्होंने श्रुतिमधुर मन का मादक 'रवि' इस अमृत नाम का पान नहीं किया ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९०)

व्यतीत्यानेकासां सुरयुगततीनां समुदयं
त्वया नाप्तो मादृग् वृजिननिहतोऽसाधुचरितः।
इदानीं ते पादे त्रिभुवनपते हन्त पतितं
समुद्धृत्य स्वीयं विमलमहिमानं प्रथय तम् ॥

भास्करी

हे त्रिभुवनपते ! अनेकाः सुरयुगततीर्व्यतीत्यापि त्वया मादृशः पापाचारो न प्राप्तः। परन्तु सम्प्रति तव पादे पतितं स्वमेव मत्वा मां समुद्धृत्य आत्मनो विमलमहिमानं प्रथय ॥

भानुमती

देवों के अनेक वर्ष खोज में व्यतीत कर देने पर भी मेरे जैसा पापी आपको नहीं प्राप्त हुआ होगा, किन्तु इस समय वह पापी आपके चरणों पर गिरा हुआ है। अतः अपना मान कर उसका उद्धार कर अपने विमल यश को बढ़ावें ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९१)

न मादृक्षो नीचस्तव सदृश उद्धारनिरतः
प्रकृत्याऽहं रोगी त्वमिव गदहन्ता न भुवने।
महोदारस्त्वं तु प्रकृतिकृपणोऽहं च विकलो
विचिन्त्येदं सर्वं शरणमुचितं देहि तरणे ॥

भास्करी

हे तरणे ! मादृशोऽधमो नास्ति, त्वादृशश्चोद्धारकर्त्ता नास्ति। अहं प्रकृत्या रोगाकुलः, अथ च त्वादृशो भुवने वैद्यो नास्ति। अहं प्रकृत्या कृपणः, त्वञ्च महोदारः। एतत्सर्वं विचिन्त्य यदुचितं तत् कुरु ॥

भानुमती

हे भास्कर ! इस संसार में मेरे जैसा अधम कोई नहीं है और तुम्हारे जैसा उद्धारक भी कोई नहीं, मैं प्रकृति से ही रोगी हूँ और तुम सफल वैद्य हो, मैं स्वभावतः कृपण हूँ और तुम स्वभावतः अत्यन्त उदार हो। यह सब सोचकर जो उचित समझो करो ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९२)

करस्पर्शात् कञ्जं यदि विकचतां याति सततं
तदा बद्ध्वा पद्मासनमखिलबोधेन्द्रियगतिम् ।
नियम्य त्वां यत्नाज्जपति जपनीयेन विधिना
फलं तस्याख्यातुं प्रभवति फणीशो न सवितः ॥

भास्करी

हे सूर्य, यदि तव करस्पर्शात् अचेतनं कमलमपि विकसितम्, तदा सर्वाणीन्द्रियाणि नियम्य पद्मासनमाधाय हृदये त्वां ध्यायतो जपनीयेन विधिना जपतो मानवस्य यत् फलं स्यात्, तत्फणीशोऽपि वक्तुं न पारयेत् ॥

भानुमती

हे सूर्य, यदि तुम्हारी किरणों के स्पर्शमात्र से अचेतन कमल भी खिल उठता है तो पद्मासन लगाकर उचित विधि से तुम्हारा ध्यान करते हुए जप करने के फल को शेषनाग भी नहीं बता सकते ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९३)

न बुध्ये वेदान्तं यजनमथवा शास्त्रविहितं
सपर्यां न स्तोत्रैर्मधुरपदबन्धैश्श्रुतिसुखैः।
न योगं तन्त्रं वा कमपि विधिमन्यं तव मुदे
परं बुध्ये भानो पदसरसिजे पातमनिशम् ॥

भास्करी

भगवन्! वेदान्तं न जानामि, शास्त्रविहितं यजनमपि न जानामि, श्रुतिमधुरैर्ललितललितपदशय्यायुक्तैः स्तोत्रैः सपर्यां न जानामि, योगं तन्त्रमन्यं च विधिं न जानामि, किन्तु तवचरणकमलस्य शरणागत्तिमेव जानामि ॥

भानुमती

भगवन्, न तो मुझे वेदान्त का ज्ञान है न शास्त्रविहित यज्ञ का, न कोमलकान्त पदावली से युक्त स्तुतिरूप सपर्या का ज्ञान है और न योग, तन्त्र अथवा अन्य विधियों का ही ज्ञान है, जिससे मैं तुम्हें प्रसन्न कर सकूं। मुझे तो तुम्हारी शरणागति का ही एकमात्र ज्ञान है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९४)

अरण्यानीप्रान्ते करनिकरलिप्तेऽमलतटे
मुनिर्भागीरथ्याः कमलदलमादाय करयोः ।
प्रगायन् गायत्रीं प्रमदनिकरं यं हि लभते
कुतो लभ्यः प्राज्यात् सकलसुरयागात् स भगवन् ॥

भास्करी

भगवन्! महाटवीपरिसरे किरणसमूहैर्लिप्तेर्गङ्गाया विमलतटे हस्तयोः कमलान्यादाय गायत्रीं गायन् यमानन्दमनुभवति मुनिः, अनेकेभ्यो देवयज्ञेभ्योऽपि तं न लभेत ॥

भानुमती

भगवन् ! घोर जंगलों में तुम्हारी किरणों से सुनहरे गंगा के निर्मल तट पर कमलों को हाथ में लेकर गायत्रीमन्त्र का जप करने वाले मुनियों को जो आनन्द मिलता है वह आनन्द बड़े-बड़े अनेक देव-यज्ञों से भी प्राप्त नहीं होता ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९५)

सुखं मत्वा भ्रान्तो जगति परितोऽशान्तमनसा
नमस्यां नाकार्षं सविधि सवितुः पादयुगले।
परित्यक्तो देवैरघनिकरकारीति भगवन्
इदानीं रोगार्त्तोऽशरणशरणं यामि वद कम्॥

भास्करो

भगवन्! जगति सुखं वर्तते इति तस्य प्राप्तयेऽहमशान्तमनाः सर्वत्र भ्रमणं कृतवान्, परन्तु तव पदयुगं विधिना न प्रणतवान्। सम्प्रत्यहं महापापीति सकलैर्देवैः परित्यक्तो रोगार्तोऽशरणानां कं शरणं यामीति त्वमेव वद॥

भानुमतो

संसार में ही सुख है इस बुद्धि से अशान्त होकर उसके अन्वेषण में मैं चारों तरफ भटकता रहा, किन्तु तुम्हारा विधिपूर्वक नमन नहीं किया। इस समय सभी देवों ने मेरा परित्याग कर दिया है। अतः इस वार्द्धक्य में अशरणों की जो शरण हो ऐसे किसकी शरण में जाऊँ?—यह तुम्हीं बतलाओ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९६)

धरां सस्यश्यामां कलयितुमलं जीवनदवं
जडीभूतान् जीवान् ज्ञपयितुममोघाञ्जनकरम् ।
दहन्तं तान् सर्वान् प्रकृतिकलुषान् दीधितिचयं
मुदा ध्यायं ध्यायं तृणमिव मिनोमीन्द्रपदवीम् ॥

भास्करो

पृथिवीं सस्यसम्पन्नां विधातुं कामं जलदातारम्, तमसि जडीभूतान् जीवान् बोधयितुममोघाञ्जनप्रदम्, प्रकृतिं कलुषयतः सर्वान् जीवान् दहन्तं तव दीधितिचयं मुदा ध्यायं ध्यायमैन्द्रपदं तृणमिव मन्ये ॥

भानुमती

जल प्रदान कर धरा को सस्यशालिनी बनाने वाले, अन्धकार में किंकर्त्तव्य-विमूढ़ों को मार्गदर्शन देने वाले, प्रकृति को उपद्रुत करने वाले सभी दुष्टों को जलाने वाले तुम्हारे प्रकाश का ध्यान करता हुआ मैं इन्द्रपद को भी तृण के तुल्य मानता हूँ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९७)

चिरभ्राम्यज्जीवान् विविधविधियोनौ निपतितान्
विमोक्तुं कारुण्यात् प्रलयसमये तिग्मरुचिभिः ।
विधिं भस्मीकुर्वञ्जगति रवितत्त्वं विजयते
विकारोऽपि श्लाघ्यो भवति महतां जातु विबुधाः ॥

भास्करी

अनेकासु योनिषु पतितान् चिरं भ्राम्यतो जीवान् कारुण्याद् विमोक्तुं प्रलयसमये तीक्ष्णतेजोभिः सर्वाणि कर्माणि भस्मसात् कुर्वन् रविः सर्वोत्कर्षेण वर्तते । महतां विकारोऽपि यदा कदा प्रशंसनीयो भवति ॥

भानुमती

अनेक योनियों में भ्रमण करते हुए जीवों की मुक्तिहेतु प्रलयकाल में अपनी अत्यन्त तेजस्वी किरणों से सभी कर्मों का नाश करने वाले भगवान् सूर्य हैं । बड़े लोगों का विकार भी श्लाघ्य ही होता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९८)

न वक्तुं कोऽपीष्टे त्वतुलमनुभावं दिनमणे
यतः शाम्बे कुष्ठं किरणसुधया साधु शमितम् ।
यदन्यैर्भूयोभिः सुरमुनिगणैर्दुष्करमभूद्
असाध्यं किं तत् स्याद् रविशरणयातस्य विदुषः ॥

भास्करी

दिनमणे ! तवानुपममनुभावं कोऽपि वक्तुं न समर्थः। यतोहि अन्यैर्देवैरसाध्यं शाम्बकुष्ठं स्वकिरणसुधया शान्तिं नीतम्। रविशरणं यातस्य अत एव विदुषः किमप्यसाध्यं न भवति ॥

भानुमती

हे सूर्य ! तुम्हारे अनुपमेय वर्चस्व को कोई भी नहीं बता सकता; क्योंकि सम्पूर्ण देवों की आराधना से भी न मिटा हुआ शाम्ब का कुष्ठ तुम्हारी किरणसुधा से शान्त हो गया। इसलिये आप की शरण में गये हुए के लिये कुछ भी असाध्य नहीं होता ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९९)

अविद्याकल्लोले भवजलनिधौ सम्प्रवहतः
समुद्धर्त्तुं जीवान् प्रभवति तथा न श्रुतिविधिः।
यथा भानो रश्मिर्विबुधवरवन्द्यस्य तरसा
प्रभूणां माहात्म्यं न हि भवति कस्यापि विषयः॥

भास्करी

अज्ञानमहातरङ्गे संसारसागरे निमज्जतो जीवान् समुद्धर्तुं सकलसुर-वन्द्यस्य भानो रश्मिरेव प्रभवति, न श्रौतकर्मापि। महापुरुषाणां माहात्म्यं कस्यापि विषयो न भवति॥

भानुमती

संसारसागर की अज्ञान-तरङ्ग में वहते जीवों का उद्धार सभी देवों के पूज्य सूर्य की रश्मि ही कर सकती है, वेदप्रतिपादित विधि नहीं। बड़े लोगों के ऐश्वर्य को कोई समझ नहीं पाता॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१००)

समस्ते ब्रह्माण्डे सुरनृपतिसंकीर्णवसुधे
मरीचीनामोघैरघनिकरनाशं वितनुषे ।
यदोषध्यः कामं नियतफलवृन्दं प्रसुवते
तवैवायं भानो सततमनुभावो विजयते ॥

भास्करी

भूपतिभिर्देवैश्च संसेवितेऽस्मिन् ब्रह्माण्डे सूर्यकिरणा एव सर्वं पापं नाशयन्ति । ओषधयो नियतसमये कामं फलं प्रयच्छन्ति । अयं सर्वोऽपि प्रभावः सूर्यस्यैव ॥

भानुमती

चराचर सम्पूर्ण ब्रह्माण्ड में सूर्य की किरणें ही सभी पापों को नष्ट कर सकती हैं । ओषधियाँ भी समय-समय से जो फल देती हैं यह सब भगवान् सूर्य का ही प्रभाव है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०१)

महौषध्यं सिद्धं तव किरणकारुण्यकलितं
महाव्याधिं नित्यं परिभवति हि क्षेत्रियमपि।
रसायाः सौरस्यं तव पदरजःस्पर्शजनितं
जगच्छ्रेयोरिक्तद्धौ त्वमिव भगवंस्त्वं विजयसे॥

भास्करी

क्षेत्रियरोगाणां शमनस्य सिद्धिरपि सूर्यस्य किरणैरेव। पृथिव्यां रसोऽपि सूर्यस्य पदस्पर्शादेव सम्भूतः। जगतः कल्याणे सूर्य इव नान्यः कश्चन विद्यते॥

भानुमती

मरणपर्यन्त नहीं मिटने वाली व्याधि को भी शान्त करने वाली शक्ति ओषधियों में सूर्य की किरण से ही आती है। फलों में मिठास भी सूर्यद्वारा ही आता है। जगत् के कल्याण में सूर्य के समान दूसरा कोई नहीं है॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०२)

क्षुधाधाराशीर्णश्वसनजनिना बिम्बमशितं
तवेदेयं भानो सकलजनमूलस्य करुणा।
न चेदेवं लोकेऽनतिशयिततेजोऽभिभवितुं
धरेद् धार्ष्टचं कोऽपि प्रकृतिमधुरं साधुचरितम् ॥

भास्करी

भानो ! क्षुधापीडितेन हनुमता फलबुद्धया यत् तव बिम्बमशितम् सा सकलजनमूलस्य तवैव करुणा। अन्यथा अदृश्यं तव तेजोऽभिभवितुं को धाष्टर्यं विदध्यात्। महात्मनां चरितमतीव मधुरं भवति ॥

भानुमती

भूख से व्याकुल हनुमान् ने तुम्हारा बिम्ब निगल लिया वह तुम्हारी ही कृपा का फल है। अन्यथा अत्यन्त प्रगल्भ तुम्हारे तेज का कौन अपमान कर सकता है ! बड़े लोगों का चरित स्वभाव से ही अत्यन्त मधुर होता है ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०३)

गुहामध्याद् बाह्यं नवजनितबालं शिखरिणः
प्रकामं मन्वाना नयनविषयं वाजिवदनाः ।
प्रभावन्तं भानुं मधुरमधुमत्ता युवतयः
प्रसीदन्ति प्रातः सुरकुसुमधम्मिल्लसुभगाः ॥

भास्करी

सुमेरोर्दरीतो निर्गतं तेजस्विनं सूर्यबिम्बं प्रेक्ष्य पारिजातपुष्पगुम्फित-केशा अत एव मनोहराः किन्नरयुवतयो नवजातशिशुं मत्वा प्रातर्नितरां प्रसीदन्ति ॥

भानुमती

सुमेरु पर्वत की कन्दरा से बाहर निकले हुए अर्थात् उदयमान तेजस्वी सूर्य को पारिजात पुष्प की वेणी वाली, मनोहर मदिरा से मत्त किन्नरियाँ नवजात शिशु समझकर प्रातःकाल अत्यन्त प्रसन्न हो रही हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०४)

कुले कस्मिन् वार्धौ नयनसुभगः कौस्तुभमणिः
शुभे कस्मिन् देशे फलमनघरूपं समुदितम् ।
उरो धन्यं मातुर्मसृणवपुषो रेणुरुषितं
समा रामा वामा उषसि मृदुहासा नु मिमते ॥

भास्करी

कस्य कुलोदधेर्नेत्रसुखकरोऽयं कौस्तुभमणिः, कस्य वा देशस्येदं पुण्यं फलं समुदितम्, अस्य कोमलाङ्गस्य बालस्य रेणुभिः कस्या मातुरङ्कं धन्यम्, इत्थं किन्नर्यो मन्दं मन्दं हसन्त्यः प्रातर्बालस्वरूपं सूर्यं दर्शं दर्शं तर्कयन्ति ॥

भानुमती

नेत्र को सुख देने वाला यह कौस्तुभमणि किस कुल में उत्पन्न हुआ है, किस देश का यह पवित्र फल है, किस माता की गोद को अपने अङ्ग की धूलि से धूसर बनाकर धन्य कर रहा है। इस प्रकार प्रातः काल बाल-रूप में सूर्य को देखकर किन्नरियाँ कल्पना कर रही हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०५)

समस्ते ब्रह्माण्डे विविधमणिनिस्यूतवपुषि
प्रकृष्टे हारेऽस्मिन् दिनमणिसुमेरुर्विजयते ।
विधातुर्वैदुष्यं सकलतपसासादितमिदं
फलत्येवं बिम्बं जननमरणक्लेशाहरणम् ॥

भास्करी

निखिलब्रह्माण्डरूपे विशिष्टमणिकल्पिते प्रकृष्टेऽस्मिन् हारे भगवान् सूर्यः सुमेरुरिव वर्तते । ब्रह्मणः स्वेन सम्पूर्णेन तपसाऽऽसादितस्य वैदुष्यस्य जननमरणक्लेशस्य हरणं बिम्बं फलम् ॥

भानुमती

यह ब्रह्माण्ड अनेक मणियों से गुम्फित एक उत्तम हार है, जिसके सुमेरु भगवान् सूर्य हैं। विधाता ने कठिन तपस्या से जो वैदुष्य प्राप्त किया उसके जनन-मरणजन्य क्लेश को नष्ट करने वाला यह बिम्ब फल है।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०६)

भानोर्गुणैर्गुम्फितचारुमाला
भवाटवीनाशनदावमाला ।
बुधावली चातकमेघमाला
हृद्या पदे राजतु पद्यमाला ॥

भास्करो

सूर्यस्य गुणैर्गुम्फिता भवारण्यस्य विनाशे वनाग्निमाला, विद्वच्चातकानां मेघमाला शतकस्वरूपेयं पद्यमाला भगवतः सूर्यस्य पदे विराजताम् ॥

भानुमती

भगवान् सूर्य के गुणसूत्रों से गूँथी हुई संसार रूपी अरण्य को जलाने वाली विद्वान् चातकों के लिये मेघमाला यह शतकरूप पद्यों की माला भगवान् सूर्य के चरण में सुशोभित होती रहे ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०७)

निरुपमगुणगीतं शुद्धभक्त्या समेतं
पदविरचितपोतं सन्तरीतुं भवाब्धिम् ।
शतकमिदममोघं भानवीयं नवीनं
सुरनुतपदपद्मे प्रीतये तेऽर्पयेऽहम् ॥

भास्करी

हे भगवन् सूर्य, शतकेऽस्मिन् तव निरुपमानां गुणानां संकीर्तनमस्ति, इदञ्च शतकं शुद्धभक्त्या कृतम्, भवाब्धि तरीतुममोघं पोतञ्च, अथ च नवीनं तव चरणे समर्पितं तवैव प्रसादाय भवतु ॥

भानुमती

सूर्य ! इस शतक में तुम्हारे अनुपम गुणों का कीर्तन है, यह शुद्ध भक्ति से लिखा गया है, संसारसागर से पार कराने के लिये पदों से विरचित अमोघ एवं नवीन नौका है। इसको आपके चरणों में केवल इसलिये समर्पित कर रहा हूँ कि आप प्रसन्न हो जांय ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१०८)

नामं नामं पदद्वन्द्वं स्मारं स्मारं रवेर्गुणान् ।
अखण्डानन्दसन्दोहैः क्षपयामि पुनर्भवम् ॥

उत्तरप्रदेशे देवरियामण्डलस्य तरकुलवाथानान्तर्गतमठियाशुक्ल-
ग्रामवास्तव्येन पं० श्रीचन्द्रशेखरशुक्लात्मजेन काश्यां
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणविभागा-
ध्यक्षचरेण वेदवेदाङ्गसङ्कायाध्यक्षचरेण
आचार्येण डॉ० कालिकाप्रसादशुक्लेन
विरचितं सूर्यशतकं
समाप्तम् ॥

भास्करो

सूर्यस्य पदद्वयं नत्वा तद्गुणांश्च स्मृत्वा निरतिशयानन्दैः पुनर्जन्म नाशयामि ॥

भानुमती

सूर्य के चरणों को प्रणाम कर तथा उनके गुणों का कीर्तन कर अत एव अत्यन्त आनन्दपूर्वक अपने पुनर्जन्म का नाश कर रहा हूँ ॥

उत्तरप्रदेश में देवरिया जनपद के तरकुलवा थानान्तर्गत 'मठिया शुक्ल'
नामक ग्राम के रहने वाले पं० श्री चन्द्रशेखर शुक्ल के आत्मज,
सम्पूर्णानन्द संस्कृत विश्वविद्यालय के व्याकरणविभाग
के भूतपूर्व प्रोफेसर एवं व्याकरणविभाग
तथा वेदवेदाङ्गसङ्काय के अध्यक्ष,
आचार्य डॉ० कालिकाप्रसादशुक्ल
द्वारा विरचित यह सूर्यशतक
सम्पूर्ण हुआ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शतकनिर्मातुः परिचयः

(१)

नारायण्यास्तरङ्गैः स्नपितकुलवधूबासवेश्मानवद्यं
वीचिव्रातैः सरय्वाः कवलितकलुषं श्रोत्रियक्षेत्रमेकम् ।
मीमांसान्यायशास्त्राध्ययनपटुतरैर्भूसुरैर्भूषितक्ष्मं
वेदध्वानैर्बटूनां मुखरितवलयं मण्डलं देवरीया (देववर्या) ॥

यस्य भूवलयमुत्तरस्यां दिशि प्रवहन्त्या भगवत्या नारायण्यास्तरङ्गैः पूतम् दक्षिणस्याञ्च रघुकुलतिलकस्य राघवस्य कुलदेवतायाः सरय्वास्तरङ्गैस्तीर्थीभूतम्, पङ्क्तिपावनानां भूदेवानामद्वितीयं स्थानम् मीमांसान्यायादिशास्त्राणामध्ययनशीलैर्विप्रैर्भूषितम्, ब्रह्मचारिणां वेदघोषैर्मुखरितम्, तत् देवरियाभिधानं जनपदमस्ति लेखकस्य ।

जिसका भूभाग उत्तर में बहती नारायणी के तरल तरङ्गों से पवित्र है, जो दक्षिण में बहती रघुकुल की कुलदेवता सरयू नदी से तीर्थस्वरूप है ! जहाँ मीमांसा न्यायादि शास्त्रों के अध्ययन करने वाले ब्राह्मणों का निवास है तथा जो ब्रह्मचारियों के वेदपाठ से सर्वदा मुखरित रहता है, वह देवरिया इस शतकके लेखक का जनपद है ॥

(२)

यन्मण्डले सहृदयैरभिनन्द्यमाने
देशे कुशीनगरभव्यभुवो विशाले ।
देवाङ्गनासततकीर्तितकीर्तिमाले
निर्वाणमाप विधिना भगवान् स बुद्धः ॥

यस्य देवरिया जनपदस्योदारचरितैर्विद्वद्भिः प्रशस्यमाने कुशीनगराभिधानस्य नगरस्य विशाले देवाङ्गनाभिरभिगीतयशस्के स्थाने भगवान् बुद्धो निर्वाणमाप्तवान् ॥

जिस देवरिया जनपद के उदार विद्वानों द्वारा प्रशंसित कुशीनगर नामक विशाल एवं भव्य क्षेत्र में जिसका गुणानुवाद देवाङ्गनायें भी करती हैं, भगवान् बुद्ध ने निर्वाण प्राप्त किया ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(३)

भूटान-तिब्बत-जनैरधुनाप्यसंख्यै-
जापानचीनकृतवासजनैश्च बौद्धैः ।
निर्वाणभूरियमतिप्रथिता पृथिव्यां
सम्पूज्यते प्रतिदिनं विविधोपचारैः ॥

यस्य कुशीनगरस्य निर्वाणम् संख्यातीतैर्भूटान तिब्बत चीन-जापानदेशानां बौद्धैः प्रतिदिनं विविधैरुपचारैरर्च्यते ॥

कुशीनगर की प्रख्यात उस निर्वाणभूमि का पूजन भूटान, तिब्बत, चीन और जापान देश के बौद्धों द्वारा प्रतिदिन अनेक सामग्रियों से किया जाता है ॥

(४)

पावापुरी जनपदस्य सरोजिनीव
नृणां सुवासयति मानसमानसानि ।
अर्हन्मतं शिवदमद्वयमादिशन् स
वीरो गतो विगतराग इहैव मुक्तिम् ॥

तस्य कुशीनगरस्य नातिदूरे पूर्वस्यां दिशि देवरियाजनपदस्य कमलिनीव पावापुरी जनानां मानसमिव मानसं सुवासयति । यत्र वीतरागो भगवान् महावीरः कल्याणकरमर्हन्मतमुपदिशन् निर्वाणं गतः ॥

कुशीनगर के समीप पूर्वदिशा में देवरिया का गौरव बढ़ाने वाला 'पावापुरी नगर' अतिशय आनन्द देने वाला है । जहाँ वीतराग भगवान् महावीर जैनमत का उपदेश करते हुए निर्वाण प्राप्त किए हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(५)

सद्भिर्महद्भिरभितो ह्यभिवन्द्यमानो
विद्वद्विभावितगुणः पवहारिपादः।
पाक्कावलीप्रथितपीठपदाभिषिक्तो
यन्मण्डलं पदरजोभिरलङ्करोति ॥

सद्भिर्महद्भिश्च परितः प्रणम्यमानो विद्वद्भिः प्रचारितगुणः पैकवली-प्रधानपीठाभिषिक्तः श्री पवहारीमहाराजोऽपि देवरिया मण्डलं स्वपाद-रजसा समलङ्करोति ॥

सन्तों एवं महन्तों से सतत प्रणम्यमान विद्वानों द्वारा जिनके गुण चारों ओर प्रचारित हैं ऐसे पैकवली प्रधान पीठाधिपति श्री पवहारी जी महाराज भी इस देवरिया जनपद को अपने चरणों की धूलि से पवित्र करते हैं ॥

(६)

पारे सरय्वधिगतो विमलं हि मञ्चं
वर्षानिदाघशिशिरेषु समानभावः।
बाबा च देवरहवा किल योगिराजः
साक्षात्करोति निवसन्निह तत्त्वमेकम् ॥

परमपावन्याः श्री सरय्वा विमले पुलिने वर्षानिदाघशिशिरेषु समान-भावेन मञ्चमधितिष्ठन् योगिराजः श्री देवरहवाबाबा अस्मिन्नेव मण्डले-ऽद्वितीयं ब्रह्म साक्षात्करोति ॥

परमपवित्र सरयू जी के निर्मल तट पर वर्षा, ग्रीष्म तथा शिशिर ऋतु में समान रूप से निवास करते हुए श्री देवरहवा बाबा भी इसी जनपद में निवास करते हुए ब्रह्म का दर्शन कर रहे हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(७)

कल्लोलजालसरयूकमनीयकच्छे
भव्यं हि रुद्रपुरमिन्द्रपुरं व भाति।
कैलासशृङ्गत इहागतदुग्धनाथं
लोको विलोकयति लोलदृशा ललामम् ॥

सरय्वा उत्तालतरङ्गैः प्रक्षालिते अत एव पवित्रे कच्छे अमरावतीव रुद्रपुरं विभाति। यत्र कैलासवासं परित्यज्य समागतं दुग्धेश्वरनाथं लोकोऽस्मिन्नेव जनपदे चञ्चलदृशा विलोकयति ॥

श्री सरयू के तरल तरङ्गों से पवित्र तथा कमनीय रुद्रपुर में कैलास से आये हुए दुग्धेश्वरनाथ का दर्शन जनता करती है॥

(८)

श्री राघवेन्द्रपदपूतपरागपुञ्जं
विख्याति भागलपुरं सरसीव हंसः।
योगक्रियाक्षपितकल्मषसाधवोऽपि
पश्यन्ति सादरमिदं भवयातनाघ्नम् ॥

अस्मिन्नेव जनपदे मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य पद्भ्यां पूतपरागं भागलपुरं सरसि हंस इव विख्यातिं लभते। नगरमेतत् भवयातनानिवारणाय योगिनोऽपि सादरं सभाजयन्ति ॥

भगवान् रामचन्द्र के चरणरज से परमपवित्र भागलपुर इस देवरिया जनपद में सरोवर में हंस की तरह है। योगी लोग भी संसार-दुःख को मिटाने के लिये आदरपूर्वक इसका दर्शन करते हैं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(९)

सीताविवाहभवचापविभङ्गबोधो
निर्माय कुण्डमतिमोहनसोहनागे।
तेपे पुरा पशुराम इतः समाधिं
लोकास्तदा प्रभृति तीर्थमिदं मनन्ति ॥

सीताविवाहावसरे शङ्करधनुषो भङ्गेन रामावतारस्य बोधो यस्य, एवंभूतः श्रीपरशुरामो देवरियामण्डलस्य कमनीये सोहनागस्थाने कुण्डं निर्माय तप आचचार इति जनश्रुतिः। तत एव स्थानमिदं तीर्थत्वेन लोकैः प्रख्यापितम् ॥

सीता के विवाह निमित्त स्थापित भगवान् शङ्कर के धनुष के टूट जाने पर 'राम-अवतार हो गया'—ऐसा ज्ञान होने के पश्चात् श्री परशुराम जी इसी मनोहर सोहनाग स्थान पर एक दिव्य कुण्ड बनाकर तपश्चर्या में तत्पर हो गए—ऐसी जनश्रुति है। तभी से लोग इस भूमि को तीर्थ मानते हैं ॥

(१०)

पुन्नागजातिकरवीररसालजालात्
क्षोणीधरोपमविशालधरान्तरालात्।
भक्तार्तिनाशनपरश्च कुबेरनाथ
आविर्बभूव सहसा प्रियमण्डलेऽस्मिन् ॥

अस्मिन् रमणीये देवरियाजनपदे पुन्नागजातिकरवीराम्रसमूहैः परिवृताद् भूधरसदृशाद् विशालाद् भूमिभागात् भक्तानामार्तिनाशनाय श्री कुबेरनाथः शिवः साक्षादाविर्बभूव ॥

इस रमणीय देवरिया जिले में सदाबहार, चमेली, कनेर, आम आदि से घिरा हुआ पर्वत के समान विशाल धूस वाले भूगर्भ से भक्तों की पीड़ा शान्त करने वाले श्री कुबेरनाथ महादेव स्वयं ही प्रकट हुए ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(११)

विख्याते तिरुपट्टिकामहुववा ग्रामे बुधैर्मण्डितेऽ-
नन्तानन्दसरस्वतीपदरजःस्पर्शान् महत्त्वं गते ।
भानोर्भव्यविशालमूर्त्तिरधुना खातात् समुद्भाविता
तेनेदं त्वनुमीयते बुधवरा आसन्निनोपासकाः ॥

विविधविद्याविशारदैर्बुधैर्निषेविते विशेषेण श्री अनन्तानन्दसरस्वती· (पूर्वाश्रमनाम-श्री अवधनाथः) पदरजसः स्पर्शेन विशिष्टां प्रतिष्ठां प्राप्ते पावापुरी (फाजिलनगर) समीपे तिरुपट्टी महुववाग्रामे कतिपयवर्षेभ्यः पूर्वं भव्या विशाला सूर्यस्य मूर्तिर्गर्तात् निर्गमिता । तेनेदमनुमीयते यदत्र बुधाः सूर्योपासका आसन् ॥

इसी जनपद के फाजिलनगर के समीप, जो विद्वानों का स्थान कहा जाता है, स्वामी श्री अनन्तानन्द जी महाराज (पूर्वाश्रम का नाम श्री अवधनाथ पाण्डेय था) की जन्मभूमि होने के परम पवित्र है, ऐसे तिरुपट्टी महुववा नामक ग्राम में भगवान् सूर्यनारायण की भव्य एवं विशालमूर्ति उत्खनन द्वारा प्राप्त हुई है । अतः अनुमान है कि यहाँ पर भी सूर्य की उपासना की प्राचीन परम्परा थी ॥

(१२)

तस्मिन्नेवानवद्यः श्रुतसततरतैः पण्डितैर्मण्डितो का
गण्डक्या क्षालितक्ष्मः कृतमठ 'मठिया शुक्ल' नामा चकास्ति ।
ग्रामो दूरादुपेतैरधिकृतवसतिः शास्त्रचिन्ताभिलाषै-
र्यत्र स्थाता द्विसन्ध्यं हिमगिरिशिखरं प्रेक्षते कौतुकेन ॥

तस्मिन्नेव जनपदेऽतीव निर्मलः शास्त्रनदीष्णैः पण्डितैर्मण्डितः गण्डकीनद्याऽनवद्यभूभागः, छात्रनिलयः, मठियाशुक्लाभिधो ग्रामोऽस्ति । तत्र दूरादागत्य विद्यार्थिनः शास्त्राध्ययनं कुर्वन्ति । तत्र निवसन्तो जनाः प्रातः सायञ्च नगाधिराजस्य शिखरं कौतुकेन पश्यन्ति ॥

उसी देवरिया जनपद में ''मठिया शुक्ल' नामक एक ग्राम है । जहाँ शास्त्र में कुशल विद्वान् निवास करते हैं जिसका एक भूमाग गण्डकी नदी से पवित्र है, जहाँ दूर-दूर से आकर छात्र सर्वदा शास्त्र को चिन्ता करते रहते हैं और जहाँ के निवासी प्रतिदिन प्रातः तथा सायं काल नगाधिराज हिमालय का दर्शन किया करते हैं । (यही ग्राम इस सूर्यशतक के लेखक का जन्मस्थान है) ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१३)

गर्गस्यर्षेस्तपोभिर्व्यपगतवृजिने मामखोराख्यधाम्नि
विप्रा आप्ताः समस्ता जपनियमपरा ब्रह्मसाक्षादकुर्वन् ।
गौरीनाथो हि तेषां पशुपतिनगरीतीर्थयात्राप्रसङ्गाद्
आगत्यास्मिन् न्यवात्सीत् सवनसमुचिते गर्गवंशावतंसः ॥

सरय्वास्तीरे बड़हलगञ्जनामकनगरस्य सविधे गर्गस्यऋषेस्तपोभिरतिपावने मामखोराभिधे धाम्नि जपनेयमपरा विप्रा आप्ता आसन्। येषाञ्च ब्रह्मसाक्षात्कार आसीत्। तेषु कश्चन गर्गवंशावतंसो गौरीनाथनामा सुधीः नेपाल भूपाल राजधान्यां काठपाण्डूनगर्यां विराजमानस्य भगवतो भूतनाथस्य पशुपतिनाथस्य दर्शनं सम्पाद्य प्रत्यागतस्तपःसमुचितेऽस्मिन् ग्रामे न्यवात्सीत् ॥

सरयू नदी के तीर पर बड़हलगञ्ज नगर के समीप गर्ग ऋषि के तप से अत्यन्त पावन मामखोर नामक ग्राम में जप-नियम में तत्पर सभी ब्राह्मण आप्त थे और उनको ब्रह्म का साक्षात्कार था। उनमें से गर्गवंशभूषण श्री गौरीनाथ शुक्ल भगवान् पशुपतिनाथ जी का दर्शनकर लौटते समय, तपोभूमि इस ग्राम में रह गये ॥

(१४)

भार्यायां धर्मवत्यां शिवजनि सुषुवे सूनुरत्नं बुधोऽसौ
तेजस्वी च स्वभावात् प्रथितशुभकथोऽभून्नकच्छेद शुक्लः ।
लाक्षायां सोऽपि पत्न्यां चतुरुदधिसमानम्बिकादत्तमुख्यान्
सूनून् श्रीसर्वदेवं सहृदयहृदयं सर्वराजं स्म सूते ॥

स गौरीनाथो धर्मवत्यां भार्यायामेकं पुत्रमजनयत्। स कामं यशस्वी लोकप्रसिद्धो नकच्छेदनाम्ना प्रसिद्धिमगात्। श्री नकच्छेदोऽपि लाक्षायां धर्मपत्न्यां चतुरुदधिसमानान् चतुरः पुत्रानजीजनत्। तत्र त्रयाणां क्रमेण नामानि—(१) श्री अम्बिकादत्तशुक्लः (२) श्री सर्वदेवशुक्लः (३) श्री सर्वराजशुक्लः।

श्री गौरीनाथ शुक्ल की धर्मवती पत्नी से एक पुत्र हुआ जिसका नाम नकच्छेद शुक्ल था। श्री नकच्छेद शुक्ल को धर्मपत्नी श्री लाक्षा देवी से चार पुत्र हुए। उनमें से तीन का क्रम से श्री अम्बिका दत्त शुक्ल, श्री सर्वदेव शुक्ल तथा श्री सर्वराज शुक्ल नाम था ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१५)

तुर्यं सूनुञ्च धाम्ना कृतधवलकुलं शेखरं चन्द्रपूर्वं
वेदान्तन्यायविद्ये कगमदतितरां शब्दविद्यानवद्ये।
मिश्रोपाह्वात् कुमारात् प्रथमशिवपदाच्चान्यशास्त्रं स चन्द्रः
सूनूंस्त्रीन्मङ्गलायामजनयदमलानेककन्याञ्च धन्याम् ॥

चतुर्थः पुत्रः श्री चन्द्रशेखरशुक्लो यशस्वी महामहोपाध्यायात् श्री शिवकुमारमिश्रादधीतव्याकरणादिशास्त्रः श्रीमङ्गलायां त्रीन् पुत्रान्, एकां कन्याञ्च अजीजनत्।

चतुर्थ पुत्र श्री चन्द्रशेखर शुक्ल ने महामहोपाध्याय श्री शिवकुमार शास्त्री जी से व्याकरणादिशास्त्रों का विधिवत् अध्ययन किया। इन्होंने श्री मङ्गला नाम की धर्मपत्नी से तीन पुत्र तथा एक कन्या को उत्पन्न किया।

(१६)

दैवज्ञः प्रथमः सुतः स कमलाकान्तोऽपि नीतौ मतो
नीतिज्ञो हि जनार्दनः कुलमणिर्लोकप्रियश्चान्तिमः।
विद्यावारिधिसत्सभापतिपदाद् विद्यालवस्याप्तये
काशीं संश्रितवान् प्रसादचरमोऽसौ कालिकाख्योऽपरः॥

प्रथमः श्री कमलाकान्तशुक्लो दैवज्ञः, तृतीयो लोककुशलो यशस्वी च श्री जर्नादनशुक्लः, द्वितीयः श्री कालिकप्रसादशुक्लः सर्वतन्त्रस्वतन्त्रस्य श्री सभापतिशर्मोपाध्यायस्य शिष्यः काशीं संश्रितवान् ॥

प्रथम पुत्र श्री कमलाकान्त शुक्ल ज्योतिषी हुए। द्वितीय श्री जनार्दन शुक्ल लोककुशल एवं यशस्वी पुरुष हुए। तृतीय श्री कालिकाप्रसाद शुक्ल, सर्वतन्त्र-स्वतन्त्र पं० श्री सभापति शर्मोपाध्याय के शिष्य, विद्याध्ययन की दृष्टि से काशी में ही रहने लगे।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(१७)

जानक्यां धर्मपत्न्यां कुलगुणसहितं रामनारायणाख्यं
कन्याञ्चैकां कुलीनां गुणगणमहितां भारतीं भारतीं व।
पुत्रं पुत्रीमुदारस्वजनयदसकौ वंशसंवर्द्धनाय
भारञ्चारोप्य सूनौ तरणिचरणयोः साम्प्रतं त्वर्पितान्तः॥

शतकनिर्माता श्री कालिकाप्रसादशुक्लः स्वधर्मपत्न्यां जानक्यां श्री रामनारायणशुक्लं पुत्रं सरस्वतीञ्च पुत्रीं जनितवान्। सम्प्रति योग्यपुत्रे सर्वं गृहभारमारोप्य भास्करचरणसेवायां दत्तावधानोऽस्ति ॥

इस शतक के लेखक श्री कालिकाप्रसाद शुक्ल ने अपनी धर्मपत्नी श्री जानकी शुक्ल से एक पुत्र श्री रामनारायण शुक्ल तथा एक कन्या श्री सरस्वती को उत्पन्न किया। आप इस समय अपने योग्य पुत्र पर समस्त गृहभार को छोड़कर भास्करचरण की सेवा में अन्तःकरण को अर्पित किए हुए हैं।।

(१८)

आकाशाग्निवियद्विलोचनमिते संवत्सरे वैक्रमे
भाद्रे शुक्लदले महारविदिने तिथ्यामधिद्वादशि।
जानक्या परिचिन्तितालयकथः सद्धर्मपत्न्या मुदा
काश्यां स्वान्तसुखाय सूर्यशतकं पूर्ति प्रसादोऽनयत्॥

२०३०तमे वैक्रमे संवत्सरे भाद्रमासे शुक्लपक्षे महारविदिने द्वादश्यां तिथौ श्री ज़ानक्या धर्मपत्न्या सम्पादितसकलगृहभारोऽहं श्रीकालिका-प्रसादशुक्लः स्वान्तसुखाय काश्यां सूर्यशतकं पूर्तिमनैषम् ॥

संवत् २०३० (दो हजार तीस) में भाद्रपदमास के शुक्लपक्ष की द्वादशी तिथि को रविवार के दिन धर्मपत्नी श्रीजानकी शुक्ल द्वारा घर का सम्पूर्ण भार सँभाल लेने पर निश्चिन्तता से आत्मसन्तोषार्थ मैंने इस सूर्यशतक को पूर्ण किया।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)